M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 520

Title: Tarka Sangraha
Chandrika

520

तर्कसंग्रहचंद्रिका।

Title	Tarka Samgraha Chandrika
Author	Mukund Bhatt Suri
Editor	Gadegil.
Year, Vols.	
Publisher	
Remarks	

520

॥ श्रीगुरुगणेशांबिकाभ्यो नमः॥ गलद्दानोद्रेकभ्रमदलिकदंबाकुलशिरो धुनानः
संतोषादिव निजगुरोः स्तांडवविधेः प्रचंडैर्दोर्दंडैः प्रबलतरविघ्नौघदमनो म
नोगम्यं नव्यं वितरतु शिशुः शैलदुहितुः॥१॥ सांबं शिवं नमस्कृत्य तर्कसंग्रहचंद्रि
का॥ गाडगिलकुलोत्पन्नमुकुंदेन वितन्यते॥२॥ प्रणम्य विदुषो नूनमहं कुर्वे नि
वेदनं॥ बालबुध्या मदीयोयं निबंधो नावधीर्यतां॥३॥ ग्रंथारंभे विघ्नोपशमाय वि
हितं मंगलमंतेवासिशिक्षायै निबध्नाति निधायेति॥ अत्र च मंगलस्य विघ्नध्वंस
द्वारा समाप्तिसाधनतेति प्राञ्चः॥ तत्र यद्यपि मंगलस्य समाप्तिसाधनता न प्रत्य
क्षप्रमाणगम्या॥ कादंबर्यादिवन्वयतो नास्तिकग्रंथादौ व्यतिरेकतो व्यभिचा राम०
रेण कारणत्वप्रत्यक्षजनने प्रत्यक्षप्रमाणसहकारिणः॥ स्वस्वव्याप्येतरयाव १

त्कारणसत्वे यत्सत्वे अग्रिमक्षणे अवश्यं यत्सत्वं यदभावे यदभावः इति नियतान्वयव्य
तिरेकसहचारग्रहस्यासंभवात्॥ अन्वयदलमात्रोपादाने यावत्घटकारणसत्वे
उदासीनसत्वेऽग्रिमक्षणे घटसत्वादुदासीनेतदापत्तिः स्यादतो व्यतिरेकदलं॥ तथा
सति उदासीनाभावे घटाभावाभावान्न दोषः॥ कपालाकाशसंयोगतद्व्याप्यकपाल
द्वयसंयोगातिरिक्तयावद्घटकारणसत्वे कपालाकाशसंयोगाभावे घटाभावेन क
पालाकाशसंयोगवारणायान्वयदलं तद्घटकमवश्यमिति च॥ तथा सति कपाला
काशसंयोगतद्व्याप्यकपालतदुभयसंयोगेतरकारणसत्वे तत्सत्वे अग्रिमक्षणे अ
वश्यं तत्सत्ताया अभावान्न दोषः॥ यावत्कारणसत्वे दंडव्यतिरेक एवासिद्धोऽत
ः स्वेनेरेति॥ दंडव्यापारभ्रम्यादिसकलकारणसमवधाने दंडव्यतिरेके घटव्य

तिरेकोऽसिद्धेः नःस्वव्याप्येतरेति॥घटप्रागभावसंग्रहायाग्निमक्षणइति॥अन्यथा
घटोत्पत्तिकालेघटप्रागभावाभावेपिघटव्यतिरेकाभत्वादसंग्रहापत्तेः॥सत्वंचोत
त्तिः॥अभावोपितस्यैवाअन्यथातद्दोषतादवस्थ्यापत्तेः॥तथापिमंगलंसमाप्ति
साधनंसमाप्तिकामनाजन्यत्वमाजन्याचारविषयत्वादित्यनुमानेनैवसाध्या
त्या अत्रचयोयत्कामनाजन्यत्वमाजन्याचारविषयः तत्साधनंयथादर्शादि
स्वर्गसाधनं॥आचारःकृतिः स्वर्गकामनाजन्याचारविषयत्वस्यचैत्यवंदनेपि
सत्वात्तत्रव्यभिचारवारणायत्वमाजन्येति तथाचतदाचारस्येष्टसाधनत्वांश्रो
त्रमजन्यत्वान्नव्यभिचारः नचनास्तिकादिग्रंथेव्यभिचारात्तत्समाप्तिसाध राम०
नत्वानुमानमितिवाच्यं तत्रापिजन्मांतरीयस्यमंगलस्यकल्पनात्तस्यसंदिग्ध २

त्वेपितत्संदेहस्यसाध्यसंदेहपर्यवसन्नतयानुमितावप्रतिबंधकत्वात् साध्याभा
वांशेनिर्णयात्मकवृत्तित्वांशेसंदेहनिर्णयसाधारणव्यभिचारज्ञानस्यैवप्रतिबं
धकत्वात्॥तस्यचाशुतरविनाशिनःकालांतरभाविसमाप्तिजनकत्वानुपपत्या
विघ्नध्वंसोद्वारंप्रतिबंधकाभावत्वेनतस्यावश्यकत्वात् नत्वपूर्वंतथासतिमं
गलस्यलौकिककर्मांगत्वाभावप्रसंगात् अलौकिकंलौकिकेनांगमितिस्त्रा
त् तस्यापूर्वरूपोपकारजनकांगविषयत्वात् कादंबर्यादौसत्यपिमंगलविशे
षेसमाप्त्यभावः प्रकृतमंगलानाश्यविघ्नसत्वादेव एवंचस्वप्रतियोगीचरम
वर्णानुकूलकृतिमत्वसंबंधेनविघ्नध्वंसविशिष्टसमाप्तिंप्रतिआत्मनिष्टप्रत्या
ससामंगलंकारणमितिपर्यवसितं नातश्चरमवर्णध्वंसरूपसमाप्तेराकाशनि

ष्टत्वेपि क्षतिः॥ वस्तुतो ज्ञानविशेष एव समाप्तिरिति न दोष शंकापि। जन्मांतरीयग्रं
थसमाप्तिमुद्दिश्य मंगले शिष्टप्रवृत्त्यापत्तिस्तु न शंक्या जन्मांतरीयसमाप्तित्व
स्य कस्यचिल्लक्ष्यतावच्छेदकत्वाभावेन तस्याः सुदूरपराहतत्वादिति यत्तु मंग
लस्य समाप्तिसाधनत्वं नास्ति मंगले कृतेपि किरणावल्यादौ समाप्त्यदर्शनादि
ति तन्न व्यापकसत्त्वे व्याप्यासत्त्वस्यादोषात् मणिकृतस्तु मंगलस्य विघ्नध्वं
स एव फलं विघ्नसंशयनिर्णययोः शिष्टानां तदाचरणाद्विघ्नाभावस्याकां
क्षितत्वात् निर्विघ्नं समाप्यतामिति कामनापि नागृहीतविशेषणन्यायेन विघ्न
ध्वंसविषयत्वेनोपपन्ना न समाप्तिसाधनत्वव्यवस्थापिका स्वर्गी स्यामितिवत् राम० ३
समाप्तिस्तु लोकावगतकारणादेवेत्याहुः मंगलत्वं च स्तुत्याद्यन्यतमत्वं स्तुति

श्चोत्कर्षवत्तया ज्ञापनं ज्ञापनं ज्ञानानुकूलः शब्दः न च स्वरूपाख्यानेऽतिव्याप्तिः तस्या
पि स्तुतित्वे भवतां स्वरूपं कथयामो न स्तुम इति प्रामाणिकव्यवहारसंगतेरिति वाच्यं ज्ञा
नपदस्य प्रमापरत्वात् अत एवारोप्यगुणकथनं स्तुतिरिति प्रामाणिकाः भगवत्स्तु
त्यादेर्न तत्प्रयोगो नाङ्गः स्वावधिकोत्कर्षवत्तया ज्ञापनं नमस्कार इत्यलं बहुना नि
धायातिशयेन ध्यात्वा ध्यानं धात्वर्थ एव उपसर्गो द्योतकः नन्वितरनिबंधसत्त्वे कि
मेतस्य प्रयोजनमित्यत आह बालानामिति बालानां व्युत्पन्नानां सुखेनानायासेन यो
बोधस्तस्मै तर्क्यंते विचार्यंते इति तर्काः पदार्थास्तेषां संग्रहः संक्षेपेण व्युत्पादनं
क्रियते वर्त्तमानकृतिविषय इत्यर्थः आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्या
सितव्य इति श्रुत्या मननत्वदर्शनेष्टसाधनत्वावगमात् तत्र चेष्टाकांक्षायां वात्रिसत्र

न्यायेननसपुनरावर्त्ततेइत्यर्थवादोपस्थितंमुक्तिरूपमेवतदवगम्यते एवंश्रुतिवाक्य
जन्यात्मविषयकशाब्दज्ञानरूपश्रवणस्यात्मनइतरभिन्नत्वेनात्वेनानुमानरूपमन
स्यविजातीयप्रतीत्यनावविशिष्टसजातीयप्रतीयप्रतीत्यनुवृत्तिरूपध्यानप्रवाहा
त्मकनिदिध्यासनस्यचतत्त्वेष्टसाधनत्वावगमात्तत्रचतदाकांक्षायांपाठक्रमापे
क्षयाऽर्थक्रमस्यबलीयस्त्वेनात्मतत्त्वज्ञानमेवतादृशत्वेनावगम्यते तथाचेदज्ञाम
ननस्येतरपदार्थज्ञानसाध्यतयातस्यचोद्देशलक्षणपरीक्षात्मकशास्त्राधीनत्वेन
तत्राप्युद्देशंविनाधर्मिधीसाध्यलक्षणादेः कर्तुमशक्यत्वेनप्रथमतःपदार्थान्निर्दि
शति द्रव्येति।द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाःपदार्थाःसप्तेत्यन्वयः रा.म०
यद्यप्यभावोनाहत्योपदिष्टस्तथापिविशेषपरीक्षणेतत्रकृताऽभ्युपगतोऽय ४

मितिज्ञायते तथाचाभ्युपगमसिद्धांतसिद्धोयंसाक्षादसूत्रितस्यविशेषपरीक्षणादभ्या
भ्युपगमस्यैवाभ्युपगमसिद्धांतत्वात् यथामनसइंद्रियत्वं घ्राणरसनचक्षुस्त्वकश्रो
त्राणींद्रियाणिनत्वन्यइतिसूत्रेणतस्येंद्रियत्वानुपदेशेपितस्येंद्रियत्वेनपरीक्षणा
त् तथाचपदार्थोद्देशेनचरमपदलक्षणयाद्रव्याद्यन्यतमत्वविधानात् उद्देश्यवि
धेयभावस्थलेचविधेयतावच्छेदकरूपेणविधेयस्योद्देश्यतावच्छेदकव्यापकत्वबो
धस्यव्युत्पत्तिसिद्धतयाद्रव्यादिभेदवृत्तिसप्तत्वावच्छिन्नप्रतियोगिताकद्रव्यभेदा
भाववत्त्वरूपस्यान्यतमत्वस्यप्रकृतेविधेयत्वेनतस्यचपदार्थत्वरूपोद्देश्यतावच्छे
दकव्यापकत्वावगमेनाधिक्यव्यवच्छेदसिद्धिः न्यूनव्यवच्छेदस्तुसप्तत्वान्वयादेवल
भ्यः॥वक्ष्यमाणनिरूपणक्रमस्यैवोद्देशक्रमेनियामकत्वात् तन्नियामकबलेनैव

पदार्थानुद्दिश्य तत्क्रमादेव प्रथमं द्रव्याणि विभजते तत्रेति निर्द्धारणे सप्तम्यंतात्त्रल् तेषु
पदार्थेषु मध्ये पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव द्रव्याणीत्यन्व
यः विभागश्च सामान्यतोऽवगतानां विशेषरूपेणाभिधानं नवत्वेनन्यूनसंख्याव्यवच्छे
दः एवकारेणाधिकसंख्याव्यवच्छेदः यथा पार्थ एव धनुर्धर इत्यत्र विशेष्यसंगतेनैवका
रेण पार्थान्यस्मिन् धनुर्धरत्वव्यवच्छेदो बुध्यते तथेहापि नवातिरिक्ते द्रव्यत्वस्य व्यव
च्छेदबोधात् विशेष्यविशेषणक्रियासंगतैवकारस्य क्रमेणान्ययोगायोगात्यन्तायोग
व्यवच्छेदबोधकत्वात् शंखः पांडुर एव नीलं सरोजं भवत्येवेत्यादौ शंखे पांडुरायोग
स्य सरोजे नीलत्ववतात्यंतायोगस्य व्यवच्छेदबोधात् तमस्तु न द्रव्यं तस्य महाप्रभा राम०
त्वावच्छिन्नाभावरूपत्वात् नवानुगतं द्रव्यत्वं जातिविशेषः स च संयोगविभाग ५

समवायिकारणतावच्छेदकतया सिद्धः गुणान्विभजते रूपरसेति गुणाश्चतुर्विंश
तिरियोजना रूपरसगंधस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वा
परत्वे बुद्धिः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणा इति सूत्रेण काणादैः सप्तदशोक्ताः गुरु
त्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दसमुच्चितत्वेन नाप्यकारोक्तैः मिलित्वा चतुर्विंशति
रित्यर्थः॥ अदृष्टत्वस्यानुगतस्य सत्त्वेपि गुणत्वसाक्षाद्व्याप्यजात्यैव गुणानां विभाग इ
तिनियमे मानाभावेन धर्मत्वाधर्मत्वाभ्यां विभागः परंतु सूत्रोक्तक्रमत्यागे बीजं मृग्यं
गुणपदशक्यतावच्छेदकतया सिद्धो गुणत्वाख्यो जातिविशेषो रूपादिचतुर्विंश
त्यनुगतः न च शक्यतावच्छेदकतया जातिसिद्धौ विभुपदशक्यतावच्छेदकतया विभु
त्वमपि सिध्येदिति वाच्यं न तत्त्वेन सांकर्यापत्त्या विनिगमनाविरहेणानयोरपि जा

तित्वासंभवात् तदुक्तमाचार्यैः गुणत्वंनामसामान्यविशेषइति गुणेषुचतुर्विंशतिस
ख्याचैकार्थसमवायादिना अपेक्षाबुद्धिविशेषविषयत्वरूपंवाचतुर्विंशतित्वंबो-
ध्यं कर्मविभजते उत्क्षेपणेति कर्माणिपंचेत्यन्वयः सामान्यंविभजते परमप
रंचेति परत्वंव्यापकत्वमपरत्वंव्याप्यत्वं विशेषंविभजते नित्यद्रव्यवृत्तयइति
सामान्यांतर्गतित्वशंकाव्युदासायानंताइति प्रतिव्यक्तिभिन्नाइत्यर्थः समवायं
विभजते समवायस्त्विति अभावंविभजते अभावश्चतुर्विधइति अभावत्वंचा
खंडोपाधिः समवायैकार्थसमवायान्यतरसंबंधेनसत्ताभाववत्त्वंवासमवायसं रामु०
बंधेनसत्ताभावस्यसामान्यादावपिसत्वादेकार्थेति एकार्थसमवायेनसत्ताभावस्य ९
नित्यद्रव्येसत्वात्समवायेति यद्यप्यन्यत्रसंसर्गाभावत्वान्योन्याभावत्वाभ्यांद्वैविध्य

मुक्तंतथाप्यवांतरप्रागभावत्वादिनिर्विभागावश्यकत्वेकिमतगडुनासंसर्गाभावत्वे
नविभजनेनेतिग्रंथकृतोनिगर्वः क्रमप्राप्तांपृथिवींलक्षयति गंधवतीति पृथिव्यागंध
वत्त्वंलक्षणं लक्षतावच्छेदकंचगंधसमवायिकारणतावच्छेदकतयासिद्धःपृथिवीत्वा-
ख्यजातिविशेषएव अन्यथागंधजनकतेजःसंयोगात्पृथिव्यामिवतेजस्यपिगंधप्र
संगात् ननुलक्षणंइतरभेदानुमापकंतथाचसुगंधिसलिलेसुरभिःसमीरणइत्याद्यनु
भवात्गंधवत्त्वंजलादावप्यस्तिइतितस्यपृथिवीतरभेदानुमापकत्वासंभवेनकथंगंध
वत्त्वंपृथिवीलक्षणमितिचेन्न तादृशप्रतीत्यास्वाश्रयसंयुक्तत्वरूपपरंपरासंबंधे
नकुसुमाद्युपाधिनागतगंधस्यैवविषयीकरणात् समवायेनतस्यजलादावभावे २।
नसमवायेनतस्येतरभेदानुमापकत्वेबाधकाभावात् ननुपृथिव्याअनित्यत्वेऽवय

वानवस्थापत्तिःनित्यत्वेकार्यस्यगंधवतःद्रव्यांतरत्वापत्तिरितिअतआह साद्विविधेति
नित्यापरमाणुरूपेति अनवस्थाभयेनतस्यनिरवयवत्वादवयवनाशतत्संयोगना
शरूपनाशकाभावेनतस्यनित्यत्वं नचपरमाणौमानाभावः त्रसरेणुःसावयवद्र
व्यारब्धःचाक्षुषद्रव्यत्वादित्यनुमानेनद्व्यणुकस्यैवपरमाणोरपिसिद्धेः नव्यास्तु
त्रुटिनावयवजन्या किंतुनित्यैवतस्यामेवचात्यंतापकृष्टमहत्वप्रयुक्तःपरमाणुव्य
पदेशः नचपूर्वोक्तानुमानात्तत्सिद्धिः तस्याप्रयोजकत्वादित्याहुः अनित्याकार्य
रूपेति परमाणुनाममहत्वात्संयोगविशेषविशिष्टानामपितेषांप्रत्यक्षानुपपत्त्या
संयोगविशिष्टैःपरमाणुसमूहैर्नद्व्यणुकघटादिप्रतीत्युपपत्तिरितिभावः नव्यबौद्धा रम॰ ७
णुमहत्वस्यसंयोगविशेषरूपत्वेनतस्यैवद्रव्यप्रत्यक्षप्रयोजकत्वात्तद्विशिष्टपरमा

णुसमूहप्रत्यक्षेणकिमपिबाधकमित्याहुः सापुनरिति साकार्यलक्षणा शरीरेंद्रिये
ति शरीरत्वंचनजातिःपृथिवीत्वादिनासांकर्यात् किंतुद्रव्यसमवाय्यवृत्तिचेष्टावद्वृ
त्तिजातिमत्वंसखंडोपाधिः तादृशीचजातिर्मनुष्यत्वगोत्वादिरूपा अहत्यंतेनहस्त
त्वादिव्युदासः नचवृक्षादेःप्रवृत्तिरूपकारणबाधेनमानाभावेनचचेष्टावत्वविरहा
दुक्तंप्रमितिवाच्यं स्थावरावृक्षतृणौषधिगुल्मलतावतानवनस्पतइत्यादिनाभाष्य
कृतावृक्षादेर्विषयप्रभेदत्वस्योक्तत्वेनतस्यालक्ष्यत्वात् इंद्रियत्वंचात्मान्यत्वेसतिशा
नकारणमनःसंयोगाश्रयत्वं व्यापारप्रत्यासत्त्यासाक्षात्कारकरणत्वंवा विषयत्वं
चशरीरेंद्रियभिन्नकार्यद्रव्यत्वं शरीररूपांपृथिवीमाह शरीरमस्मदादीनामिति
शरीरस्यपांचभौतिकत्वेपिपृथिवीसमवायिकारणकत्वात्पृथिवीत्वं पृथिवीसम

सायिकारणकत्वंचक्षेदाघ्रणगमेपि गंधानुवृत्तेरित्यभिप्रायः आदिपदेनायोनिजदे
वादिशरीरपरिग्रहः इंद्रियरूपांपृथिवीमाह इंद्रियमिति नचात्रमानाभावः गं
धसाक्षात्कारोमनोभिन्नेंद्रियजन्यः मानसेतरसाक्षात्कारत्वात् चाक्षुषवदित्यनु
मानस्यैवतत्त्वात् एवमग्रेपि गंधपदस्थानेरसादिपदंनिक्षिप्यज्ञेयं घ्राणसंज्ञकंत
स्यपार्थिवत्वसाधकहेतुगर्भविशेषणमाह गंधग्राहकमिति जलाद्यनभिव्यक्तमि
त्यादिः तेनश्लेष्माभिनयकालेगंधाग्राहेपिनक्षतिः तथाचघ्राणेंद्रियंपृथिवीपर
कीयरूपाव्यंजकत्वेसतिगंधव्यंजकद्रव्यत्वात् कुंकुमगंधव्यंजकघृतादिवत् इ
त्यनुमानात्सिद्धिः रूपेपरकीयत्वनिवेशान्नदृष्टांतासिद्धिः यद्वा गंधःस्वाश्रयद्रव्य राम॰ ८
वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्करणकानुभवग्राह्यः प्रतिनियतेंद्रियग्राह्यगुणत्वा

न्यगुणत्वात्नास्वरूपवदित्यनुमानात्तत्सिद्धिः इदमेवगंधपदस्थानेरसादिपदंनि
क्षिप्यज्ञेयं नासाग्रेति अग्रावच्छेदेननासावृत्तिः एवमुत्तरत्रघ्राणरसनत्वचांस्वाधि
ष्ठानसंबद्धार्थग्राहकत्वंअन्येषांतुसंबद्धार्थग्राहकत्वमेवस्वतंत्रास्तुगंधसाक्षात्कारोऽतीं
द्रियकरणकजन्यसाक्षात्कारोऽतींद्रियकरणकजन्यसाक्षात्कारत्वात् चाक्षुषवदि
त्यादेरप्रयोजकत्वेनादृष्टविशेषजनितानासिकैवघ्राणमितिवदंति विषयरूपां
पृथिवीमाहविषयास्त्विति इयंचरूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि
भागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारसवती क्रमप्राप्तंजलंलक्षयति शीतेति
शीतस्पर्शवत्त्वमपांलक्षणं जलत्वंजातिः साचत्रुटिपर्यंतंजलंजलमित्याकारका
ध्यक्षसिद्धा जलत्रुटिःजलोपादेयजलसमवेतामहाजलत्वादित्यनुमानात् परमा

णुकद्व्यणुकयोस्तत्सिद्धिः अप्रतिबाधकेऽनुगतप्रतीत्या जातिसिद्धेर्निष्प्रत्यूहत्वात् ननुज
लशरीरस्यैवेतस्यकुतोनाध्यक्षमतआह वरुणलोकइति तथाचविप्रकृष्टत्वान्नोपलम्भ
तइतिभावः एवमुत्तरत्रापि नचात्रमानाभावः जलत्वंशरीरसमवायिवृत्तिद्रव्यारंभकनि
त्यवृत्तिजातित्वात्पृथिवीत्ववत् इत्यनुमानस्यैवतत्त्वात् इदमेवचजलत्वस्यानेनतेज
स्त्वादिपदमाक्षिप्यान्येपिज्ञेयं जलीयादिशरीरस्यपृथिव्यनारब्धत्वेपिपार्थिवभागा
नामुपष्टंभकत्वसंयोगसत्त्वादुपभोगसमर्थत्वं विजातीयानांसमवायित्वमात्रं
नाभ्युपेयतइतिहृदयं रसग्राहकमिति पित्ताद्यनभिभूतमित्यादि रसनंजलंप
रकीयरूपाव्यंजकत्वेसतिपरकीयरसव्यंजकत्वात् सक्तुरसव्यंजकोदकवत् द्विती
यपरकीयत्वनिवेशात्स्वरसव्यंजकशर्करादौनव्यभिचारः इदंचगंधंविहायस्ने

राम०
९

हंविनियोज्यपूर्ववोक्तिचतुर्दशगुणवत् शेषंपूर्ववत् तेजोलक्षयति उष्णस्पर्शवदिति
विलक्षणनीलादिजनकतावच्छेदकतयातेजस्त्वसिद्धिः इंद्रियंरूपग्राहकमिति जलाद्य
नभिभूतमित्यादिः चक्षुरिंद्रियंतैजसंपरकीयस्पर्शाव्यंजकत्वेसतिपरकीयरूपव्यंजक
त्वात् प्रदीपवत् द्वितीयपरकीयनिवेशात्स्वीयरूपव्यंजकेगोलकेनव्यभिचारः च
क्षुरिंद्रियंचस्वसंबद्धार्थग्राहकं नचैवंस्फटिकादिव्यवहितपदार्थोनगृह्येतेतिवाच्यं अ
भिघातिनाःस्वच्छद्रव्येणैवचक्षुर्गमनप्रतिबंधनियमेनस्फटिकादिनागमनप्रतिबं
धासंभवेनस्फटिकादिव्यवहितस्यापिचक्षुःसंबधत्वानपायात् नचतथापिशाखाचं
द्रमसोर्युगपत्प्रत्यक्षानुपपत्तिरितिवाच्यं दृष्टांतात् यौगपद्याभिमानस्ययुगपच्छत
पत्रभेदेनाभिमानवत्संभवात् भौममिति काष्टादिरूपपार्थिवेंधनकं अविंधनमिति

आप एवेंधनमुद्दीपकं यस्येत्यर्थः विद्युदादीत्यादिना सौरवड्वानलपरिग्रहः उदर्यमि
ति उदर्यस्यौदनादेपरिणामःपाकजरसमलधातूनांउत्पादस्तत्रहेतुनिमित्तं आकरज
मिति आकरः खनिः तत्रजातंसुवर्णादीत्यादिनारजतादिपरिग्रहः सुवर्णंतैजसंअ
त्यंतानलसंयोगेप्यनुच्छिद्यमानद्रवत्वात् यन्नतैजसंतन्नात्यंतानलसंयोगेप्यनुच्छि
द्यमानद्रवत्ववत् यथाघृतादि नन्वास्तुगुरोःपीतरूपवतःसुवर्णस्यपार्थिवत्वमे
वात्यंताग्निसंयोगेपिद्रवत्वानुच्छेदःपीतान्यरूपानुत्पादश्च द्रवत्वस्यात्यंतानुच्छेदेरूपां
तरानुत्पादेस्वर्णस्यप्रतिबंधकत्वकल्पनयाप्युपपद्यतइतिप्राहुः इदंचरूपस्पर्श सम॰
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारवत् वायुंलक्ष १०
यति रूपरहितेति रूपरहितत्वेसतिस्पर्शवत्वंलक्षणंवायोःसत्यंतेनपृथिवीतेज

सो विशेषदलेनगगनादीनांनिरासः सचस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि
भागपरत्वापरत्वापरत्ववेगवान् स्पर्शोस्यानुष्णाशीतत्वेसतिअपाकजः तथा
चनायं मार्गोस्यानुष्णाशीतत्वसत्यपाकजइतिप्रत्यक्षश्च अत्रद्रव्यत्वेनसंख्या
परिमाणपृथक्त्वसंयोगविभागाःसिद्धाः मूर्तत्वेनपरत्वापरत्वे तृणकर्मवायुसं
योगात्इति [illegible] नोदनाद्यजन्य तृणादिकर्मवेगवद्द्रव्याभिघातजंवि
लक्षणक्रियात्वादित्यनुमानेनतत्सिद्धिस्तुसाध्यतावच्छेदकनयेनिबोध्यं नन्वसौका
र्यरूपएवतदाऽवयवधारायामनवस्था यद्यणुरेवतदाऽणुगतस्पर्शस्यातींद्रियत
यातदीयस्पर्शग्रहोनस्यादित्यतआह सद्विविधइतिशरीरयोग्यानुपलब्धिबाधंनि
रस्यति वायुर्लोकइति वायुत्वंचअवयवशरीरवृत्तिद्रव्यारंभकनित्यानित्यवृत्तिजाति

त्वात् पृथिवीत्ववत् इत्यनुमानादेव तत्सिद्धेः इंद्रियमिति स्पर्शसाक्षात्कारो मनोभिन्नें-
द्रियजन्यः मानसामान्यसाक्षात्कारत्वादित्यनुमानेन तत्सिद्धिः तत्र वायुत्वसिद्धिस्तु त्वगि-
न्द्रियं वायवीयं रूपाव्यंजकत्वे सति परकीयस्पर्शव्यंजकद्रव्यत्वात् अंगसंगि-
सलिलशैत्याभिव्यंजकव्यंजनपवनवदित्यनुमानेन परकीयत्वद्रव्यत्वपदाभ्यां स्वस्प-
र्शाभिव्यंजकग्रीष्मोष्मेंद्रियसन्निकर्षयोर्न व्यभिचारः ननु त्वगिंद्रियं यदि करचरणा-
द्येकैकावयवाधिष्ठेयं तदान्यावयवसंयुक्तात् त्वगायां घटादेः स्पार्शनं न स्यादित्यत आह
सर्वशरीरेति सर्वावयवावच्छेदेन शरीरवृत्तीत्यर्थः केशादीनां न तच्छरीरावयवत्वं
देहान्तरमेव तदुत्वादस्यागमसिद्धत्वात् इति भावः स एकोपीति। सः प्राणः उपाधिभे- रामः
दादिति। क्रियाभेदादित्यर्थः मुखनासिकाभ्यां निष्क्रमणप्रवेशनात् प्राणः मलादीना- ११

मधोनयनादपानः आहारेषु पाकार्थं वह्नेः समंनयनात् समानः ऊर्ध्वंनयनादुदानः
नाडीमुखेषु वितरणात् व्यान इति यद्यपि भाष्यादौ शरीरेंद्रियविषयप्राणभेदेन चा-
तुर्विध्यमुक्तं तथापि प्राणस्य विषयरूपत्वेनापि विभागसंभवात् त्रैविध्यमुक्तमिति ध्ये-
यं वायोरप्रत्यक्षत्वेपि व्यंजनचालनेनान्तरानुभूयमानः पृथिव्याद्यवृत्तिस्पर्शो द्रव्या-
श्रितः स्पर्शत्वात् इत्यनुमानमेव तत्र प्रमाणं मीमांसकास्तु वायोः प्रत्यक्षत्वमेव व-
दंति जन्यवायुत्वावच्छिन्नजनकतावच्छेदकत्वेन वायुपदशक्यतावच्छेदकतया वा-
युत्वसिद्धिरिति दिक् आकाशं निरूपयति शब्दगुणमिति समवायेन शब्दवत्त्वमा-
काशलक्षणं बोध्यं शब्दस्य गुणत्वोक्तेरवस्तुगुणवत्त्वेन द्रव्यत्वसिद्धेः शब्दो द्रव्याश्रि-
तो गुणत्वादित्यनुमानस्य धर्मिग्राहकस्य स्फोरणाय च तथाहि सामान्याश्रयत्व

विशिष्टप्रतिनियतबहिरिंद्रियग्राह्यत्वेन तत्रगुणत्वसिद्धौस्पर्शवत् गुणान्यकाला
दिचतुष्टयावृत्तिशब्दोद्रव्याश्रितोगुणत्वादित्यनुमानेनाकाशसिद्धिः स्पर्शवत्द्रव्य
समवेतत्वमादायार्थांतरवारणायपक्षतावच्छेदककोटौस्पर्शवद्विशेषणगुणान्य
त्वनिवेशः कालादिवृत्तित्वमादायार्थांतरवारणायतत्रैवकालादिचतुष्टयावृत्ति-
त्वनिवेशः पक्षतावच्छेदकसिद्धिस्त्वेवं शब्दोनस्पर्शवद्गुणः प्रतिनियतेंद्रियग्राह्य
त्वेसतिस्वाश्रयसमवायिकारणवृत्तिगुणपूर्वकसजातीयान्यत्वात् ज्ञानवत्
परत्वापरत्वयोर्व्यभिचारवारणायसत्यंतं रूपरसादौव्यभिचारवारणायविशेष्यं
पाकजरूपादौव्यभिचारवारणायजातीयइति नात्मगुणःश्रोत्रग्राह्यत्वात् राम०
शब्दत्ववत् नदिक्कालमनसांविशेषगुणत्वात् गंधवत् इत्याद्यनुमानेक्षिति १२

कर्तुरेकत्वेलाघवमितिलाघवज्ञानेनक्षितिकर्तुरेकत्वमिवशब्दाश्रयस्यैकत्वेला
घवमितिलाघवज्ञानसहकारेणशब्दवृत्त्यन्योन्याभावप्रतियोगितानवच्छेदके
कत्ववत्वरूपमेकत्वंप्राकृतानुमानादपिशब्दाश्रयस्यसिध्यति लाघवाच्चनित्य
त्वं महानाकाशस्तथात्माचेतिसूत्रेणाकाशःपरममहत्परिमाणवानस्पर्शभू-
न्यत्वेसतिप्रत्यक्षगुणाश्रयत्वात्आत्मवदित्याद्यनुमानेनतत्रविभुत्वमित्यभि
प्रायेणाह तच्चैकंविभुर्नित्यंचेति।।गगनंएकत्ववत्संख्यावत्त्वात् इत्यनुमानात्
लाघवज्ञानसहकृतात्शब्दवन्मात्रनिष्ठान्योन्याभावप्रतियोगितानवच्छेदके
कत्वपक्षसिद्धिःसंयोगविभागयोःशब्दासमवायिकारणत्वस्यक्लृप्तत्वात्समवा
यिकारणप्रत्यासत्तिनियमेनाकाशेतयोःसिद्धिः तथाचशब्दसंख्यापरिमाण

ष्टयत्कसंयोगविभागवान् घटाकाशमठाकाशादिभेदव्यवहारस्त्वौपाधिकः सएवचो
पनीगुरुवीणादिशब्दसाक्षात्कारजनकादृष्टविशिष्टकर्णशष्कुल्यवच्छिन्नः शब्दग्राह
कश्रोत्रव्यपदेशभाक् तस्यसत्वेप्यदृष्टाभावात्पुरुषस्यबाधीर्यत्तत्पुरुषस्यकर्ण
शब्दस्यैवतत्पुरुषेणाग्रहणात् नसर्वेषांसर्वशब्दोपलब्धिः शरीरेसुखमित्यादेरिववी
णायांध्वनिरित्यादिकोव्यवहारः कालंनिरूपयति अतीतादीति आदिनावर्त्तमानत्व
भविष्यत्वयोरुपसंग्रहः अतीतत्वंवर्त्तमानध्वंसप्रतियोगित्वं ध्वंसेवर्त्तमानत्वंचप्र
यागाधिकरणकालवृत्तित्वं भविष्यत्वंचवर्त्तमानप्रागभावप्रतियोगित्वं अत्रस
र्वत्रकालस्यघटकत्वात्तत्सिद्धिः ननुसूर्यक्रियादेरेवातीतत्वादिव्यवहारोपपत्तौनम राम० १३
हाकालःसिध्यतीतिचेन्न प्रकारांतरेणतत्सिद्धेर्निष्प्रत्यूहत्वात् तथाहि कालिक

परत्वापरत्वयोर्विप्रकृष्टत्वसन्निकृष्टत्वयोर्ज्ञानंनिमित्तकारणमितिसिद्धांतः एवंचस्थवि
रनिष्ठकालिकपरत्वंप्रतिस्थविरविशेष्यकयुवविप्रकृष्टत्वज्ञानंकारणंयुवनिष्ठका
लिकापरत्वंप्रतिचयुवविशेष्यकस्थविरसन्निकृष्टत्वज्ञानंकारणंस्थविरनिष्ठयुववि
प्रकृष्टत्वंचयुवापेक्षयाधिकसूर्यक्रियावत्वं युवनिष्ठस्थविरसंन्निकृष्टत्वंचस्थविरा
पेक्षयाल्पसूर्यवत्वं क्रियायाःसमवायातिरिक्तसाक्षात्संबंधाभावात् स्थविरादौचसमवाय
बाधात्स्वाश्रयसूर्यसंयुक्तद्रव्यसंयोगित्वात्मकपरंपरासंबंधेनैवतद्वत्वंवाच्यं तथाच
तद्घटकत्वेनातिरिक्तकालस्यद्रव्यांगीकारआवश्यकः तथाचपत्वजनकंबहुतरसू
र्यक्रियाविशिष्टज्ञानमिदंपरंपरासंबंधघटकसापेक्षंसाक्षात्संबंधाभावेसतिविशि
ष्टज्ञानत्वात् लोहितःस्फटिकइतिवत् इत्यनुमानमेवतत्रप्रमाणं नचतद्घटकत्वं

पृथिव्यादिचतुर्णां मनसो वा सर्वत्र विद्यमानत्वे तत्संयोगसत्वे मानाभावात् नाकाशात्मनोस्तयोः प
रंपरासंबंधाघटकत्वात् अन्यथाएकनैयायिकदंडसंयोगेनैयान्तरेपिस्वाश्रयदंडसंयुक्ता
काशादिसंयुक्तत्वात्मकपरंपरासंबंधेनदंडसंयोगस्यसत्वात्दंडविशिष्टबुद्धिप्रसंगात्
रूपाद्याश्रयत्वादिधर्मिग्राहकमानसिद्धयोरन्यसंबंधघटकत्वेमानाभावाच्च सूर्यक्रि
यासंबंधघटकत्वेनसिद्धस्यकालस्यास्यसंबंधघटकत्वेमानाभावेनकालमादायपू
र्वोक्तापत्तेरशक्यत्वात् यावन्मूर्त्तेषुकालिकपरत्वाद्युत्पत्त्यनुरोधेनावश्यकल्प्य
यावन्मूर्त्तसंयोगित्वान्यथानुपपत्त्याकालेपरमहत्वांगीकारः लाघवज्ञानादिसहका
रेणचैकत्वनित्यत्वेइत्यभिप्रायेणाह सचैकोविभुर्नित्यश्चेति संख्यायाश्चपृथ का॰मु॰
क्त्वव्याप्यत्वात् संख्यावत्वेनपृथक्त्वसिद्धिः संयोगसिद्धिस्तुधर्मिग्राहकप्रमाणेनैवा १४

नत्वाशकत्वेनचविनाशः तथाचसंयोगविभागसंख्यापरिमाणपृथक्त्ववान्कालः दि
शंलक्षयति प्राप्राच्यादीति आदिनाऽवाचीप्रतीच्युदीचीप्रभृतीनांसंग्रहः व्यवहार
:शब्दप्रयोगः तद्धेतुत्वंचतज्जनकज्ञानविषयत्वं यदपेक्षयोदयाचलसन्निहिता
दिक्ततःप्राची अस्ताचलसन्निहिताप्रतीची सुमेरुसन्निहितोदीची तदसन्नि
हितादक्षिणा एवंतद्देशीयप्राच्यवधिकदक्षिणात्वेसतितद्देशीयदक्षिणावधिकप्राची
प्राच्यवाचीनतद्देशीयप्राच्यवधिकोदीचीत्वेसतितद्देशीयोदीच्यवधिकप्राच्युदीचीतद्दे
शीयप्रतीच्यवधिवधिकदक्षिणात्वेसतितद्देशीयदक्षिणावधिकप्रतीचीप्राच्यवाचीनतद्दे
शीयप्रतीच्यवधिकोदीचीत्वसतितद्देशीयोत्तरावधिकप्रतीचीप्रतीच्युदीचीनक्षत्र
मंडलापेक्षयायतःपृथिवीसादिगधः पृथिव्यपेक्षयानक्षत्रमंडलंयतःसादिगूर्ध्वा

निबोध्यं दूरत्वसमीपत्वरूपत्वरूपदैशिकपरत्वापरत्वजनकंमवधिसापेक्षबहुतरा
ल्पतरसंयोगविशिष्टज्ञानमिदंपरंपरासंबंधघटकसापेक्षंसाक्षात्संबंधाभावेसति
विशिष्टज्ञानत्वात् लोहितस्फटिकइतिप्रत्ययवत् परंपरासंबंधश्चस्वसमवायि
संयोगः तद्घटकत्वेनदिशः सिद्धिः शेषंकालवत् आत्मानंनिरूपयति ज्ञानाधि
करणमिति समवायेनज्ञानवत्त्वमात्मनोलक्षणं संबंधविशेषणलाभायैवाधिक
रणपदं आत्मत्वंजातिविशेषः सचसुखसमवायिकारणतावच्छेदकतयासिद्धः
नित्यस्येत्यादिव्याप्तेरप्रयोजकत्वेनतस्येश्वरसाधारण्येपिक्षतिविरहः तस्येश्वरसा राम०
धारण्येप्रमाणंतुआत्मपदगतश्रुतिरेवसद्विविधेति सः आत्मत्वजातिविशिष्टः द्वि १५
धा ईश्वरत्वधर्मद्वयवान् परमात्मेति परमत्वमुत्कर्षः सचजीवाक्षयासर्वज्ञता

दिरूपस्तदाह तत्रेश्वरः सर्वज्ञः परमात्माएकएवेति अयंचकर्तैवननुभोक्ता ब्रह्मविष्णुशि
वशरीरावच्छिन्नः सृष्टिस्थितिप्रलयकारी संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धीच्छा
प्रयत्नात्मकगुणाष्टकवान् एकत्वंचास्यसजातीयद्वितीयराहित्यं परमात्मनिप्रमाणं
तुसर्गाद्यकालीनंद्व्यादिज्ञानविषयतयासत्कार्याश्रयत्वात् कपालवत्इत्याद्यनुमा
नमेव समवायेनकार्यंप्रतिविषयतयाज्ञानादीनांहेतुत्वात् घटादेर्ज्ञानेच्छाकृतीना
मन्वयव्यतिरेकाभ्यांहेतुत्वसिद्धसंग्राहकलाघवेनतत्कार्यतायाः कार्यत्वेनैवाव
छेदात् एकदाविज्ञत्वविज्ञत्वदुःखित्वमुक्तत्वसंसारित्वादिविरुद्धधर्मसमावेशा
त्जीवाःनंनाइत्यभिप्रेत्याह जीवःप्रतिशरीरमिति अयंचकर्ताभोक्ताचअयंच
चव्यापकोऽन्यथानानादेशसंचारिशरीरेसुखदुःखाद्यनुपलंभापत्तेः आत्म

नोप्रत्यक्षत्वप्रसंगेनानित्यत्वापत्त्याचाणुत्वसावयवत्वयोरभावेनामूर्त्तत्वात्संचारानुप
पत्तेर्मूर्त्तेर्मूर्त्तत्वस्याणुत्वसावयवत्वान्यतरनियतत्वात्तस्यानित्यत्वेचजातमात्र
स्येष्टसाधनताज्ञानाभावेनेच्छानुपपत्तेर्नित्यश्चेत्यभिप्रेत्याह विभुर्नित्यश्चेति विभु
त्वात्परममहत्त्वंबोध्यं तथाचसूत्रं विभवान्महानाकाशस्तथाचात्मेति आत्मैकत्वप्रति
पादकश्रुतीनांमुमुक्षुणांत्मनिष्टेनत्रविनवमित्यत्रतात्पर्यान्नतद्विरोधः अयं
चसंख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभा
वनाख्यचतुर्दशगुणवान्विभागांताद्रव्यत्वात्सिद्धाः बुध्यादयःप्रयत्नांताप्रत्यक्षा
ःधर्माधर्मौसुखदुःखहेतुत्वाद्भावनाचस्मृतिहेतुत्वात् मनोनिरूपयति सुखाद्युप रामृः १६
लब्धीतिविजातीयसंबंधसंयोग संबधावच्छिन्नजन्यज्ञानादिजनकतावच्छेदकतया

ज्ञानकसंयोगहेतुक्रियाजनकतावच्छेदकतयावसिद्धं मनस्त्वाख्यजातिमत्त्वंतल्लक्ष
णं तच्चप्रत्यात्मनियतत्वादिति प्रत्यात्मप्रतिजीवंनियतत्वात्ज्ञानोत्पादकसंयो
गसंबंधेनावश्यकत्वात् अनंतप्रतिशरीरंभिन्नंतस्यैकत्वएकस्यस्यात्रनिदशामप
रस्यचाक्षुषाद्यनुपपत्तेः तस्याणुत्वेनसकलेंद्रियैरेकदासंयोगाभावात् पर
माणुरूपमिति विभुत्वाभावान्नपरममहत्त्वं तथाचसूत्रं तदभावादणुमनइति
तदभाववचनादणुपरिमाणमितिभाष्यं विभुत्वेइंद्रियाणांस्वस्वविषयैःसह
महसन्निकर्षसत्वेमनसासहापिएकदातत्तदिंद्रियसन्निकर्षसंभवादेकदात
त्तदिंद्रियजन्यज्ञानानापत्तेः सर्वसंयोगवत्त्वलक्षणधर्मकल्पनापत्तेश्च
नचविभुत्वाभावेनपरममहत्त्वाभावेपिअपकृष्टमहत्त्वेबाधकाभावइतिवा

घं तथासत्यपिज्ञानयौगपद्यापत्तेर्दुर्वारत्वापत्तेः तत्रमानंतुसुखादिकमिंद्रियविशेष
ग्राह्यंबाह्येंद्रियाग्राह्यत्वेसतिग्राह्यत्वात् सुखादिकंसंयोगासमवायिकारणकवृत्ति
गुणत्वव्याप्यजातिमत् विभुगुणविशेषगुणत्वात् नित्यवृत्त्यनित्यविशेषगुणत्वा
द्वा शब्दवदित्याद्यनुमानमेव इदंचसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
परत्वसंस्कारवत् द्रव्यत्वाद्विभागांताः मूर्तत्वाच्चपरत्वापरत्वसंस्काराःसिद्धाः॥
तथाचोक्तं वायोर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दश दिक्का
लयोःपंचषडेवचांबरेमहेश्वरेष्टौमनसस्तथैवचेति इदंचात्मतमात्रवृत्ति
योग्यगुणादिप्रत्यक्षजननेस्वतं तदन्यप्रत्यक्षजननेचक्षुरादींद्रियज्ञानलक्ष राम० १७
णसामान्यलक्षणादिसहकारीसापेक्षं समासंख्यानिरूपणं चक्षुर्मा

त्रेति यद्यपिचक्षुरितरग्राह्यत्वेसतिचक्षुषाग्राह्यत्वंचक्षुमात्रग्राह्यत्वं तच्च
नरूपे चक्षुरितरमनःतत्संनिकर्षग्राह्यत्वात् तथापित्वगग्राह्यत्वेसत्यंतार्थ
: नचतथापिसंख्यापरिमाणव्यक्तिविशेषेतदस्त्येवेतिवाच्यं गुणपदेनत्वग
ग्राह्यचक्षुर्ग्राह्यगुणविभाजकधर्मवत्वस्यविवक्षितत्वात् अतएवप्रभाघट
संयोगेपिनदोषः अतएवातींद्रियेनतत्त्वोपपत्तिः इदंचस्वरूपकथनंनतुल
क्षणं लाघवेननीलपीतादिषुरूपंरूपमित्यनुगतप्रतीतिसिद्धजातिविशेषस्यै
वतत्वात् एकोपाधेरेवानुगतप्रतीतिनियामकत्वेतस्यचक्षुराद्यतींद्रियपदा
र्थघटितत्वेनातींद्रियत्वाल्लौकिकप्रत्यक्षानापत्तेः नचेतस्यजातिविशेषस्यप
रमाणुरूपवृत्तित्वस्वीकारोनिरर्थकः समवायेनविजातीयनीलादिकंप्रतिस्वा

आश्रयसमवेतत्वसंबंधेन नीलादेर्हेतुतया नीलत्वादेः परमाणुनीलादिवृत्तित्वेन सांकर्या
पत्तेस्तदावश्यकत्वात् नीलत्वादिजातिस्तु जन्यजनकतावच्छेदकत्वेनैव सिद्धा वस्तु
तो लौकिकविषयतासंबंधेन त्वाच साक्षात्कारप्रतिबंधकतावच्छेदकत्वेन तत्सिद्धि
रित्याद्यन्यत्र विस्तरः तच्च पार्थिवपरमाणुषु अग्निसंयोगादुत्पद्यते विनश्यति च॥
सलिलतेजसोः परमाणुषु नित्यं अवयविषु कारणसमवायिकारणकं तच्चो
द्भूतानुद्भूतभेदेन द्विधा चित्रं नीलपीताद्यारब्धघटादौ प्रत्यक्षानुपपत्त्या तत्सि
द्धिः द्रव्यचाक्षुषे रूपस्य हेतुत्वात् पीतकपालावच्छेदेन नीलोत्पत्तिवारणाय
समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसंबंधेन नीलेतररूपादेः प्र
तिबंधकत्वेन तादृशघटादौ नीलादिरूपोत्पत्त्यभावेन तेष्वि नीलव्यवहारस्योप

पादयितुमशक्यत्वात् अनास्वरं शुक्लं जलं इति नास्वरत्वं जातिविशेषस्तेजोज
न्यतावच्छेदकः तद्भिन्नत्वं वा नास्वरत्वं रसनग्राह्य इति चित्ररसे न मानं मधुरति
क्तावयवारब्धेऽवयविनि रसाभावेऽपि क्षत्यभावात् अवयवरसैरेव मधुरादिप्रती
तेरुपपत्तेः अन्यत्सर्वं पूर्ववत् घ्राणग्राह्य इति गंधत्वावच्छिन्ने पृथिवीत्वेन हेतु
त्वजातिसिद्धिः सुरभिरिति सुरभित्वासुरभित्वे गंधत्वव्याप्ये जाती अन्यत्सर्वं पूर्व
वत् त्वगिंद्रियेति एतत्तत्वं रूपविरूपणेऽक्षप्रायं शीतोष्णेति शीतत्वादिजा
तित्रयं प्रत्यक्षं अन्ये तु चित्रमंतर्भाव्य चतुर्विधं स्पर्शमाहुः एकत्वादिव्यवहा
रेति व्यवहारः प्रत्यक्षं प्रत्यक्षविषयस्य हेतुत्वात् एवमग्रेऽप्यूह्यं इदं च स्वरू
पकथनं न तु लक्षणं अननुगतत्वात् किंतु एकत्वद्वित्वाद्यननुगतसंख्याम

तिसिद्धजातिमत्त्वं एकत्वमिति एकत्वत्वजातिमत्त्वसिद्धिस्तु पूर्ववत् स्वाश्रयावयव
गतमेकत्वमसमवायिकारणं वस्तुतो भावकार्यस्यासमवायिकारणजन्यत्वनि
यमे मानाभावेन नासमवायिकारणं तन्नैकत्वं आश्रयनाशाच्च तन्नाशः द्वित्वा
दिकमिति अत्र च स्वसमानाधिकरणानि यावदेकत्वानि असमवायिकारणानि
कारणता च तत्र द्वित्वादिकं प्रति तत्तदेकत्वव्यक्तित्वेनैकत्वान्यसंख्यात्वावच्छिन्नं
प्रति एकत्वत्वेन वेति अपेक्षाबुद्धिर्निमित्तकारणं सा च तावद्यावदेकत्वाव
गाहिनी इदमेकत्वमित्याद्याकारा कार्यकारणभावश्च तत्र द्वित्वादिकं प्रति तत्तद्बु
द्धित्वेनेति तन्नाशाच्च नाश इति यदाह भाष्यकारः तस्याः खल्वेकत्वेभ्योऽनेकवि राम०
षयबुद्धिसहितेभ्यो निष्पत्तिः अपेक्षाबुद्धिविनाशाच्च विनाश इति नचैवं द्रव्ये १९

इत्यादिविशिष्टसाक्षात्कारानुपपत्तिः द्वित्वत्वादिनिर्विकल्पकक्षण एवापेक्षा
बुद्धेर्नाशे न द्वितीयक्षणे द्वित्वस्यापि नाशात् प्रत्यक्षे कार्यसहभावेन विषयहेतुत्वस्या
न्यत्र व्यवस्थापितत्वादिति वाच्यं अपेक्षाबुद्धेस्त्रिक्षणस्थायित्वोपगमात् नच योग्य
विभुविशेषगुणानां प्रति स्वोत्तरोत्पन्नगुणत्वेन नाशकत्वात् तज्जन्यसंस्कारादि
नानाशसंभवात् त्रिक्षणस्थायित्वानुपपत्तिरिति सुवाच्यं स्वत्वस्याननुगमेनैतद्व्य
क्तिविश्रामस्याशक्यतया तृतीयक्षणोत्पन्नव्यक्तेरेव नाशकत्वादिति वस्तुतस्तु
अपेक्षाबुद्धेस्त्रिक्षणस्थायित्वे मानाभावः न च पूर्वानुपपत्तिः द्वित्वोत्पत्तिसमवा
य एव सामान्यलक्षणयाऽनुभूतस्य द्वित्वत्वादिनास्मृतिं कल्पयित्वा द्वित्वाद्युत्प
त्तिद्वितीयक्षण एव तस्योपपादयितुं शक्यत्वादित्यलं पल्लवेन परिमाणमानव्य

वहारकारणमिति नाप्यमर्षतोऽनुवदति मानेतिपरिमाणं इत्यनुभवसिद्धजातिम
त्त्वं लक्षणं तच्चतुर्विधमिति अणुत्वत्वंजातिस्तद्वदणुत्वं तच्चनित्यानित्यभेदेन
द्विविधं आद्यंमनःपरमाणुवृत्ति अंत्यंद्व्यणुकवृत्ति एतदेवपारिमाण्डल्यमित्या
चक्षते तच्चनारंभकं आमलकबिल्वादिषुमहत्त्वेपितत्प्रकर्षाभावप्रयुक्तोभा
क्तोऽणुव्यवहारः अनित्यंचपरमाणुगतद्वित्वसंख्यासमवायिकारणकं मह
त्त्वंजातित्वतिमन्महत्त्वंनित्यमनित्यंच आद्यंतुअनणुद्रव्यत्वलिंगकानुमानसिद्ध
माकाशादौ अंत्यंचत्र्यणुकादौ तच्चक्वचित्प्रत्यक्षंक्वचिदनुमेयं अंत्यंचपंच
विधं केवलसंख्या परिमाण तदुभय परिमाणप्रचयोभय संख्यापरिप्रचय राम०
त्रितयासमवायिकारणभेदात् तत्राद्यंत्र्यणुकगतं तत्रावयवमहत्त्वाभावे २०

नद्व्यणुकगतत्रित्वसंख्याया एवत्र्यणुकगतमहत्त्वासमवायिहेतुत्वात् महावय
वद्वयारब्धगतं द्वितीयं महावयवैरारब्धवर्त्तमानं तृतीयं प्रचितमहावयवद्व
यारब्धतूलादिगतंचतुर्थं प्रचितमहावयवैरारब्धेपंचमं प्रचयत्वंचावयवसं
योगगतोजातिविशेषः इदमेवचशैथिल्यत्वमित्युच्यते दीर्घत्वत्वजातिमद्दी
र्घत्वं ह्रस्वत्वत्वजातिमद्ध्रस्वत्वं तत्राद्यंजन्यमहत्त्वसमानाधिकरणतयात्रस
रेण्वादावेवनत्वाकाशादौ अंत्यंजन्याणुत्वसमानाधिकरणतयाद्व्यणुकएवे
तिसंप्रदायः आचार्यास्तुह्रस्वत्वदीर्घत्वेऽपिनित्यानित्यभेदेनद्विविधे तत्रा
द्येपरमह्रस्वत्वपरमदीर्घत्वेपरमाणुषुगगनादौचयथासंख्येनज्ञेये अं
त्येतदाहृतेइत्येत्याहुः मतद्वयेपिसमिदादिषुइक्षुदंडादिकमयेह्रस्व

त्वव्यवहारोऽल्पव्यवहारइवनाक्रइत्यवधेयं चतुर्विधमपिचैतदाश्रयनाशा
देवनश्यति ननुह्रस्वत्वदीर्घत्वयोरणुत्वमहत्त्वरूपत्वमेवास्तुकृतंपरिमाणभे
देनेतिचेन्नातदवधिकमहत्तयाव्यवह्रियमाणेऽपितदवधिकदीर्घत्वव्यवहा
रात् पृथग्व्यवहारेति इदमस्मात्पृथगितिव्यवहारइत्यर्थः जातिविशेष
वत्त्वंचलक्षणं एतस्यचसावधिकत्वेनसप्रतियोगिकान्योन्याभावरूपता
संभवः नहिकश्चिद्घटात्पटोनेतिप्रत्येति इदंचैकपृथक्त्वानेकपृथक्त्वभेदेन
द्वेधा तत्रचैकपृथक्त्वंनित्यद्रव्यवृत्तिनित्यं अनित्यद्रव्यवृत्तिअनित्यं अत्रचा
समवायिकारणमवयवगतैकपृथक्त्वं आश्रयनाशाच्चतन्नाशः अनेकपृ राम॰
थक्त्वंतुघटपटौमठात्पृथगित्यादिप्रतीतिसिद्धमुभयादिसमवेतंतच्चसर्वम २१

नित्यंतत्रासमवायिकारणसमानाधिकरणंनानापृथक्त्वं निमित्तकारणंचना
नापृथक्त्वविषयकापेक्षाबुद्धिः तन्नाशाच्चतन्नाशइतिसंप्रदायः परेतु
अनेकपृथक्त्वेमानाभावः पूर्वोक्तप्रतीतिस्तुप्रत्येकवृत्तिपृथक्त्वमादायैवो
पपद्यते अन्यथाचैत्रमैत्रौदेवदत्तात्परौघटपटौरूपवंतौइत्यादिप्रतीत्याद्वि
परत्वादिद्विरूपादिसिद्ध्यापत्तेरितिवदंति संयोगःसंयुक्तप्रत्ययनिमित्तमि
तिनाप्यमर्थतोनुवदति संयुक्तव्यवहारेति जातिविशेषोलक्षणं सचायं
द्विविधः कर्मजःसंयोगजश्च तत्रकर्मजोद्विविधोऽन्यतरकर्मजोभकर्मजभे
दात् तत्राद्योनिस्त्रिहस्तसंयोगः द्वितीयोमेषयोःसंयोगः कारणाकारणस
योगजः हस्ततरुसंयोगात्कायतरुसंयोगः प्रशिथिलत्वनिबिडत्वेसंयोगत्वा

वांतरजाती तथासुकुमारत्वकर्कशत्वे पृथिवीमात्रवृत्तिसंयोगवृत्तिजातिभेदौ वै
शेषिकास्तु स्पर्शभेदावाहुः सर्वोप्ययंजन्यएव।संयोगत्वावच्छिन्नंप्रति द्रव्यत्वे
नहेतुत्वात् निमित्तकारणं अत्र प्रागभावादि तन्नाशश्च क्वचिद्विभागात् क्वचि
दाश्रयनाशात् सर्वोप्ययमव्याप्यवृत्तिरनेकाश्रितश्चेति संक्षेपः विभागं लक्ष
यति संयोगनाशक इति संयोगनाशकत्वमात्रं द्रव्यनाशेप्यस्ति अतो गुण
इति लक्षणं तु जातिविशेषो लाघवात् नव संयोगाभावरूपत्वमेवास्तु इति
वाच्यं सहि प्रागभावो ध्वंसोऽत्यंताभावोन्योन्याभावश्च वा नाद्यः
अनुत्पन्नसंयोगयोरपि तथाप्रतीत्यापत्तेः अतएव न तृतीयः रूपरसयो रामु॰
रसयोरपि विभक्तावितिप्रत्ययापत्तेश्च तंतुपटाद्योरपि तत्प्रतीत्यापत्तेः २२

अवयवावयविनोः संयोगाभावात् न द्वितीयः विभज्य संयुक्तेपि तथाप्रतीत्या
पत्तेः संयोगध्वंससत्वात् ध्वंसप्रागभावयोः सामान्याभावत्वानंगीकारात् न चतु
र्थः सर्वत्रापि तदापत्तेः अन्यत्सर्वं संयोगवद्बोध्यं वैशेषिकास्तु विभागोपि
द्विविधः कारणमात्रविभागपूर्वकः कारणाकारणविभागपूर्वकश्च आद्यः द्व्य
णुकवति परमाणौ उत्पन्नेन कर्मणा परमाणुद्वयविभागपूर्वकः परमाण्वाका
शविभागः। द्वितीयस्तु हस्ततरुविभागजः कायतरुविभाग इत्याहुः विनाशस्तु
क्वचिदुत्तरसंयोगात् क्वचिदाश्रयनाशादिति परापरेति दैशिके परत्वे एकस्यां
दिश्यवस्थितयोः पिंडयोः सन्निकृष्टमवधिंकृत्वाऽयमस्माद्विप्रकृष्टइत्येवंपर
त्वाधारे या बुद्धिरुत्पद्यते सा निमित्तकारणं पिंडपरदिक्प्रदेशसंयोगोऽस

मवायिकारणं अपरत्वेचविप्रकृष्टमवधिंकृत्वायमस्मात्सन्निकृष्टइतिधीर्निमित्तं॥
पिंडसन्निकृष्टदिक्प्रदेशसंयोगोऽसमवायी कालिकपरत्वापरत्वयोस्तुअनि
यतदिगवस्थितयोर्युवस्थविरयोरयमस्माद्बहुतरतपनपरिस्पंदांतरितज
न्माअयमस्मादल्पतरतपनपरिस्पंदांतरितजन्मेत्येवंबुद्धिर्निमित्तं तत्रपिं
डेतत्तत्कालसंयोगावसमवायिनौ एतन्नाशश्चतादृशबुद्धिनाशात् व्यवहा
रःप्रत्यक्षं जातिविशेषोलक्षणं आद्यपतनेति द्वितीयादिपतनेतुवेगासम
वायिकारणं एवमग्रेपि इदंचातींद्रियं पतनरूपकार्यानुमेयं नित्यवृत्तिनि
त्यमनित्यवृत्त्यनित्यं कारणगुणप्रक्रमोत्पत्तिः आश्रयनाशनाश्यं आद्यस्पं तम०
दनेति सांसिद्धिकंस्वतःसिद्धं नैमित्तिकमग्निसंयोगादिरूपनिमित्तजंजन्यं २३

आद्यस्योत्पत्तिविनाशौगुरुत्ववत्तुल्यौ अंत्यस्यचतौपार्थिवरूपवत्तुल्यौ चूर्णादि
ति लक्षणंतुजातिविशेषः गुरुत्ववन्नित्यानित्यत्वनिष्पत्तिविनाशाः जलमात्र
वृत्तिरिति पृथ्वीजलवृत्तिरितिपाठस्तुप्रायादिकः पृथिव्यांस्नेहाभावात् तैलाद
वपितदंतर्गतजलभागगतएवसः तथाचनाप्यं स्नेहोजलस्यैवेति श्रोत्रग्राह्यइ
ति जातिविशेषोलक्षणं ध्वन्यात्मकइति अत्रकवितोरवादिवायुसंयोगोनिमित्त
कारणं शंखाद्याकाशसंयोगोऽसमवायिकारणं कचिद्वंशादिदलद्वयविभागोनि
मित्तं द्वितीयादिध्वनौतुप्रथमादिध्वनिरसमवायिकारणं वर्णलक्षणमिति अ
त्रचयस्यवर्णस्ययत्स्थानंतेनाऽभिघाताख्यवायुसंयोगोनिमित्तं ताल्वादिना
ऽकाशसंयोगोऽसमवायी द्वितीयादिशब्देतुप्रथमादिशब्दोसमवायिकारणं

सर्वोप्ययमनित्योऽव्याप्यवृत्तिः श्रूयत्वादन्त्यः कार्यशब्दनाश्यः अंत्यस्यपात्यनाश्यः
वीचीतरंगन्यायेनकर्णविच्छेदेनोत्पन्नःशब्दोगृह्यते भेरीशब्दोगृह्यतइतिधी॥
र्नैवक्रमप्राप्तांबुद्धिंलक्षयति सर्वव्यवहारेति व्यवहारोवाक्यप्रयोगोवाक्य
प्रयोगेवाक्यार्थज्ञानस्यहेतुत्वात यद्वाव्यवहारःप्रवृत्तिः प्रवृत्तिमात्रेज्ञानस्यहे
तुत्वात् बुद्धिर्ज्ञानमिति द्वयोःपर्यायत्वद्योतनायबुद्धिज्ञानपदवाच्येत्यर्थः॥
इदंचस्वरूपकथनं लक्षणंतुजातिविशेषवत्वं जातिविशेषसिद्धिश्चस्मृतिका
र्यत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयाकार्यमात्रेज्ञानत्वेनका
रणत्वात् स्मृतिरनुभवश्चेति स्मृतित्वंचसंस्कारजन्यतावच्छेदकतयासिद्धं राम० २५
अनुभवत्वमपिविशेषणधीजन्यतावच्छेदकोटिप्रविष्टतया संस्कारजन्यमि

ति संस्कारजन्यत्वमात्रंतद्ध्वंसेपीतिज्ञानत्वाप्रवेशः तद्वतीति तद्वद्विशेष्यक
त्वावच्छिन्नतत्प्रकारत्वविशिष्टइत्यर्थः सैवप्रमेति तद्वतितत्प्रकारकानुभव
एवेत्यर्थः स्मृतिकरणस्यानुभवस्यप्रमाणांतरत्वापत्तिभियाहिस्मृतिव्यावृत्तंप्र
मात्वमामनंति प्रचरत्तुपयुक्तंतद्वतितत्प्रकारकज्ञानत्वमात्रं इदंचज्ञानोत्पादक
सामग्र्यैवगृह्यतइतिगुरुमतं तथाहिघटचक्षुःसन्निकर्षानंतरंउत्पद्यमानंचा
क्षुषंघटेघटत्वंघटत्वप्रकारतानिरूपितविशेष्यतायांघटंज्ञानेचतादृशाविशेष
तांज्ञानंचात्मनिविशेषणतयाऽवगाहतइति एतन्मते अयंघटोघटमहंजानामी
त्याकारोज्ञानग्रहः नहिज्ञानंतज्ञतप्रामाण्यंवाज्ञानांतरंग्राह्यमनवस्थानादत
ःसर्वमेवज्ञानंस्वप्रकाशं मितिमातृमेयविषयकत्वेनायमेवत्रिपुटीप्रत्यक्ष

ज्ञावादः मुरारिमिश्राणां तु व्यवसायानंतरोत्पन्नः प्राथमिको ज्ञानसाक्षात्कारो
जायमानः मनःसंयुक्तसमवायेन ज्ञानमिव मनःसंयुक्तसमवेतविशेषणत
यातज्ज्ञाते प्रामाण्यमपि विषयीकरोति प्रामाण्यघटकप्रकारतायां शुद्धं घट
त्वं विशेष्यतायां घटत्वावच्छिन्नं च व्यवसायरूपप्रत्यासत्या इति मतं ज्ञानस्यातीं
द्रियतया प्रत्यक्षासंभवेन स्वजन्यज्ञाततालिंगकानुमितिज्ञाने प्रामाण्यावगा
हिनी ज्ञातता च ज्ञातो घट इति प्रतीतिसाक्षिको ज्ञानजन्यो विषयसमवेतः पदा
र्थविशेषः तल्लिंगकप्रामाण्यानुमानप्रकारश्च यथा आदौ अयं घट इति प्रत्य
क्षं ततो विषये ज्ञाततोत्पत्तिः ततो इंद्रियसंबद्धविशेषणतया ज्ञातताप्रत्यक्षं ज्ञम० २५
ज्ञाततायां इंद्रियसंबद्धविशेषणविशेषणतया घटप्रकप्रकारकरकत्वस्यो

पनयनादिसन्निकर्षाद्विधेयतासंबंधेन घटस्य च ग्रहः ततो ज्ञातताप्रत्यक्षोद्बुद्धे
न जन्मांतरादिसंस्कारेण घटवृत्ति घटत्वप्रकारकज्ञातता घटविशेष्यकघट
त्वप्रकारकज्ञानजन्यत्वव्याप्या इति व्याप्तिस्मरणं ततस्तादृशज्ञानजन्यत्वव्या
प्यज्ञाततावतीयमिति तादात्म्यसंबंधेन व्याप्यवत्तापरामर्शस्ततः इयं ज्ञातया
घटविशेष्यकघटत्वप्रकारकज्ञानजन्या घटवृत्तिघटत्वप्रकारकज्ञातता
याः घटत्वप्रकारकं ज्ञानांतरवदित्यनुमित्या पक्षधर्मताबलात् प्रकृतज्ञाने
घटत्ववति घटत्वप्रकारकत्वसिद्धिरिति तु नव्यमतं एतत्त्रितयमतमसंगतं त
था हि लौकिकप्रत्यक्षे विषयत्वेन घटात्मवृत्तित्व घटात्मसंयोगादेः परज्ञाना
देश्च प्रत्यक्षवारणाय तत्पुरुषीयगुणमानमेतदात्ममात्रसमवेतत्वेन विष

यस्य सुखादिसाधारणात्मसमवेतमानसे मनःसंयुक्तसमवायस्य च संन्निकर्ष
विधया हेतुत्वेन ज्ञानोत्पत्तिपूर्वं ज्ञानरूपविषयस्य सन्निकर्षस्य चाभावेन ज्ञानो
त्पत्तिकाले ज्ञानप्रत्यक्षायोगात् गुरुमतमयुक्तं मिश्रमतं संनवद्युक्तिकमपि न
विचारसहं तथाहि प्रथमानुव्यवसायेन प्रामाण्यग्रहे व्यवसायोत्तरतृतीय
क्षणे ज्ञानं प्रमा न वेति संशयानुपपत्तेः तदुपपत्तयश्च नानाविधाः घटत्ववत्
द्विशेष्यतानिरूपितविसमवायसंसर्गतानिरूपितघटत्वप्रकारताकज्ञान
त्वं हि घटज्ञानप्रामाण्यं तच्च न प्राथमिकानुव्यवसायवेद्यं सांसर्गिकविष रा॰म॰
यस्यायोग्यत्वात् तत्संसर्गकज्ञानस्य तद्विशेषणकोपनीयतनानाजनकत्वा २६
तत्त्वं अन्यथा प्रमेयसंसर्गकज्ञानान्निखिलजातिप्रकारकबुद्धिप्रसंगादिति

कंटकोद्धारः तद्विशेष्यकत्वावच्छिन्नं तत्प्रकारकत्वं हि प्रामाण्यं तत्र चावच्छिन्नत्वांश
ग्रहे च न सः सामर्थ्यं संशयानुपपत्तेरिति तु वस्तुगतिः ज्ञाततायां प्रमाणेना
वेन न दृमनं तु हेयमेवेति परिशेषात् परतः प्रामाण्यग्रहः तथाहि प्रथमं घट
घटत्वे इति निर्विकल्पकं जन्यतेऽयं घट इति धीस्ततो घटमहं जानामीत्यनुव्य
वसायः व्यवसायेन विषयोपनये ज्ञानरूपधर्मिणोऽनुव्यवसायेनोपस्थितौ प्रका
रत्वादीनामनुपस्थितानामपि प्रकारत्वात् वह्निं वह्नित्वेन जानामीत्याकारको
ज्ञानग्रह एव प्रामाण्यग्रहो मनसा भवतीति समासः इदमेव च जन्यत्वविशेषि
तं गुणजन्यतावच्छेदकं प्रत्यक्षप्रमायां विशेष्यसंबद्धविशेषणविशेष्येन्द्रियसन्निक
र्षो वानुमितौ साध्यवद्विशेष्यकव्याप्यवत्ताज्ञानमुपमितौ यथार्थसादृश्यज्ञानं

शाब्दप्रमायांयथार्थतात्पर्यज्ञानंयोग्यताप्रमावागुणः अंततःसमानविषयानुभवत्वमे
वसर्वत्रगुणः तदभाववतीति प्रत्यक्षानुमितीति प्रत्यक्षत्वानुमितित्वोपमितित्वाशा
ब्दत्वाख्यः साक्षात्करोमिअनुमिनोमिउपमिनोमिशाब्दयामीतिप्रतीतिसिद्धाजाति
विशेषाः नचप्रत्यक्षत्वस्यजातित्वेसुरभिचंदनमितिचाक्षुषोत्तरंसौरभंसाक्षात्करो
मीतिप्रतीत्यापत्तिजातेरांशिकत्वाभावादितिवाच्यं सुरभिचंदनमितिज्ञानस्यसौ
रभांशेप्रत्यक्षत्वावच्छिन्ननिरूपितविषयत्वानंगीकारेणानुपपत्त्यभावात् प्र
त्यक्षानुमानेति अर्थापत्तेर्व्यतिरेक्यनुमानरूपत्वेनानुपलब्धश्चाभावप्रत्यक्षे
कारणत्वमात्रेणसंभवतिसहस्रेशतमितिसहस्रादिनिर्णयोत्तरंशतादिनिर्णयो
नुमानादेवेतिसंभवस्याप्यनुमानरूपत्वेनऐतिह्यस्यापिअनिर्णीतकर्तृकवाक्य

राम॰
२७

रूपतयाऽधिक्यविरहादित्याशयः असाधारणमिति फलायोगव्यवच्छिन्नंकार्यत्वा
नवच्छिन्नकार्यतानिरूपिकारणताशालि अनन्यथासिद्धेतिद्धेति अनन्यथासि
द्धत्वंनियतपूर्ववृत्तितावच्छेदकयद्धर्मावच्छेदेनयादृशकार्यंप्रतिनकारणत्वव्य
वहारःप्रामाणिकानांतद्रूपावच्छिन्नमेवतादृशकार्येन्यथासिद्धंतद्भिन्नत्वं निय
ताव्यवहितपूर्ववृत्तिजातीयत्वंनियतपूर्ववर्त्तित्वं नचकपालादेर्द्रव्यत्वादिनाऽन्य
थासिद्धत्वात्तद्भेदोनास्तीतिकपालत्वादिनाहेतुत्वंनस्यादितिवाच्यं येनयेनरूपेण
न्यथासिद्धिःतद्भिन्ननियतपूर्ववर्त्तित्वावच्छेदकरूपवत्त्वविवक्षितत्वात् कार्याव्य
वहितपूर्वक्षणावच्छेदेनकार्यतावच्छेदकसंबंधेनकार्याधिकरणेविशेषणतावि
शेषेणवृत्त्यभावस्यकारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकध

र्मवत्त्वंनियताव्यवहितपूर्ववर्त्तिजातीयत्वं तथाचयद्धर्मावच्छिन्नान्वयासिध्येनिरूप
कनियतपूर्ववर्त्तितावच्छेदकयद्धर्मवत्त्वंतद्धर्मावच्छिन्नंप्रतितद्धर्मपुरस्कारेणकार
णत्वमितिनिष्कर्षः कपालादेर्द्रव्यत्वादिनाहेतुत्ववारणायानिरूपकांतं तत्र
दंडत्वादिनाघटत्वावच्छिन्नकारणत्वव्युदासायनियतपूर्ववर्त्तितावच्छेदकेति
कारणंत्रिविधमिति कारणंतिस्रोविधाःप्रकाराःसमवायिकारणत्वासमवायि
कारणत्वनिमित्तकारणत्वरूपायस्यतादृशं कारणत्वंत्रिविधमितिफलितार्थः॥
समवायसंबंधावच्छिन्नकार्यतानिरूपिततादात्म्यसंबंधावच्छिन्नकारणतास
मवायिकारणता समवायसंबंधावच्छिन्नकार्यतानिरूपितसमवायस्वसमवा राम० २९
यिसमवायान्यतरसंबंधावच्छिन्नकारणताऽसमवायिकारणताअनुमित्यादौपर

मर्शादिरसमवायिकारणत्वाव्यवहारात्तद्भेदकूटस्याप्यसमवायिकारणताशरीरघ
टकत्वं एतदुभयभिन्नकारणत्वंनिमित्तकारणता यथातंतवइति तंतुसमवेत
स्यपटस्योत्पत्तेःपटश्चस्वगतरूपादेरिति समवायिकारणमित्यनुषज्यते यथा
तंतुसंयोगइति पटरूपकार्येणसहएकस्मिन्नर्थेतंतौतंतुसंयोगस्यसमवेतम
त्वात् तंतुरूपंपटरूपस्येति असमवायिकारणमित्यनुषज्यते रूपकारणेनप
टेनसहैकस्मिन्नर्थेतंतौतंतुरूपस्यसमवेतत्वात् यथातुरीति तुरीवेमादीनांसंयो
गेनकारणत्वंबोध्यं इंद्रियार्थेति विषयतासंबंधेनचाक्षुषंप्रतिसमवायसंबं
धेनचक्षुसंयोगनिष्ठकारणतानिरूपितविषयतासंबंधावच्छिन्नकार्यतावद्
त्यनुमित्यवृत्तिजातिमत्त्वंलक्षणं तेनइंद्रियत्वस्यार्थत्वस्यानेकस्याननुगतत्वेपि

नक्षतिः इत्यंतेन त्र्यणुकत्वादेरित्यंतेन तन्तत्वादेर्व्युदासः निष्प्रकारकमिति प्रकार
त्वानिरूपकमित्यर्थः निर्विकल्पके घटघटत्वसमवायानामवगाहनेपि तेषु प्रका
रत्वादीनामनवगाहनात् प्रकारत्वाद्यतिरिक्तैव निर्विकल्पकीयविषयतेति
बोध्यं सप्रकारकमिति प्रकारतानिरूपकमित्यर्थः यथा डित्थोयमिति डित्थ
त्वाख्यमित्यत्र संज्ञा प्रकारः ब्राह्मण इत्यत्र जातिः श्याम इत्यत्र रूपं संयोग इ
ति ननु रूपादिग्रहार्थमावश्यकेन संयुक्तसमवायेन घटादिग्रहसंभवे संयो
गस्य प्रत्यासत्तित्वे मानाभाव इति चेन्न आत्मग्रहार्थं तदावश्यकत्वात् परमा
णुद्व्यणुकादिप्रत्यक्षवारणाय परमाण्वादौ पृथिवीत्वग्रहवारणाय च चक्षुः राम०
संयुक्तमहद्भूतावत्समवायत्वेन तद्धेतुकत्वस्यावश्यकतयात्र सरेणुग्रहाय २९

च तदावश्यकत्वात् चक्षुषा ग्रहे आलोकवृत्तिसंयोगोपि सहकारी स च चक्षुसं
योगेनावच्छेदकेन समपेक्षते नातो भित्तिभिन्नावच्छेदेन चक्षुरालोकसंयोगस
त्त्वे प्रत्यक्षापत्तिः न च तेजः प्रत्यक्षे व्यभिचारः तेजस्यपि तेजोवृत्तिचक्षुरादिसं
योगसत्त्वात् आलोकभूतरूपानभिभूतरूपवन्महत्त्ववत्तेजस्त्वं तेनोष्मवर्णादे
र्व्युदासः श्रोत्रेणेति न च शब्दः श्रावणत्वावच्छिन्ने श्रोत्रसमवायत्वेन हेतुत्वे स
र्वेषां विद्यमाननिखिलशब्दसाक्षात्कारापत्तिरिति वाच्यं तत्पुरुषीयशब्दसम
वायत्वेन हेतुत्वोपगमात् प्रतिपुरुषं कर्णवैजात्योपगमात् शब्दस्य समवाये
पि कर्णावच्छिन्नत्वोपगमात् अभावप्रत्यक्ष इति इदमुपलक्षणं समवायप्र
त्यक्ष इति बोध्यं घटवत्यपि भूतले घटाभावसत्त्वेन तत्प्रत्यक्षवारणाय अभाव

प्रत्यक्षेयोग्यानुपलब्धिरपिकारणं साचप्रतियोग्युपलंभासाधारणकारणेतरयावत्त
दुपलंभकसहिताऽनुपलब्धिः तदुपलंभकंचमहत्त्वोद्भूतरूपालोकसंयोगादिरूप
नानाविधंकार्यवशादुन्नेयं तेनजलपरमाणौपृथिवीत्वाभावोनगृह्यते महत्त्वाभा
वादित्यधिकमाकरे सामान्यलक्षणाज्ञानलक्षणायोगजधर्माणांविशेषणेनांत
र्भावंमणिमिश्रादिसंमतमभिप्रेत्यसन्निकर्षषट्कमात्राभिधानं मतांतरे अलौ
किकप्रत्यासत्तिस्त्रेधासामान्यलक्षणाज्ञानलक्षणायोगजधर्मश्चेति सामान्यलक्ष
णंनिरूपकंयस्याःसामान्यलक्षणा लौकिकान्यमुख्यविशेष्यतानिरूपितप्रकार
तासंबंधेनचाक्षुषत्वावच्छिन्नंप्रतिप्रकारतासंबंधेनचाक्षुषत्वेनकारणता लौ रामु० ३०
किकान्यत्वनिवेशान्निर्विकल्पकोत्तरोत्पन्नसविकल्पकेनव्यभिचारःविशेष्य

ताभिन्नस्वरूपंमुख्यत्वनिवेशात् घटत्वप्रकारकस्मरणादिजन्योपनीतभानेनव्यभि
चारः ज्ञानलक्षणाज्ञानंलक्षणंस्वरूपंयस्याःसातस्यास्तुतदलौकिकप्रत्यक्षंप्रत्यक्षंप्रति
तद्विषयकज्ञानत्वेनकारणतेति योगजधर्मश्चयोगाभ्यासजन्मापुण्यविशेषः तत्कार्य
कारणभावश्चसमवायेनतद्विशिष्टसाक्षात्कारत्वारत्वावछिन्नंप्रतितादृशपुण्यविशे
षत्वेनसमवायेनकारणतेतिसंक्षेपः इतिप्रत्यक्षपरिच्छेदः अवसरसंगत्यर्थमाह
व्याख्यातमिति तथाचप्रतिबंधकान्तरशिष्यजिज्ञासातिरेकेसत्यामवश्यवक्तव्य
त्वज्ञानादनुमाननिरूपणमितिभावः अनुमितीति अनुमितिसंबंध्यभिन्नंकरण
मनुमानमित्यर्थः लक्षणंतुअनुमितिकरणत्वमात्रंअधिकांशस्यव्यर्थत्वात् लक्ष
णवाक्यजन्यबोधविषयमेवलक्षणत्वमितिनियमस्याभावात् प्रसंगादनुमिते

लक्षणमाह परामर्शेति परामर्शत्वावच्छिन्नकरणतानिरूपितरूपितकार्यतावच्छेदका
नुमितित्वाख्यजातिमत्वमित्यर्थः परामर्शत्वंच जातिविशेषः अनुमितिकरणतावच्छे
दकतयासिद्धः व्याप्तिविशिष्टमिति व्याप्तिप्रकारकमित्यर्थः व्याप्तिलक्षणमाह य
त्रेति साहचर्यनियम इति हरनिहितइतिन्यायात् नियतसाहचर्यमित्यर्थः त
च्च हेतुतावच्छेदकावच्छिन्नाधिकरणे निरवच्छिन्नवृत्तिकाभावप्रतियोगितानवच्छे
दकसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं भवतिच वह्निमान्धूमादित्यादौ धू
माधिकरणपर्वतादौ निरवच्छिन्नवृत्तिको घटाभावादिस्तत्प्रतियोगितानवच्छेदकं वह्नि
त्वमिति लक्षणसमन्वयः धूमवान्वह्नेरित्यादौ तु नाहरगोधूमाभावादिस्तत्प्रति राम० ३१
योगितावच्छेदकमेव धूमत्वं साध्यतावच्छेदकमिति नातिव्याप्तिः॥ कपिसंयोगी

एतद्वृक्षत्वादित्यादावव्याप्तिवारणाय निरवच्छिन्नवृत्तिकेत्यभावविशेषणं कपिसं
योगाभावस्तु वृक्षादौ न निरवच्छिन्नवृत्तिः मूलादेस्तदवच्छेदकत्वात् हेतुतावच्छेदका
वच्छिन्नेति करणञ्च विशिष्टसत्वस्य सत्तानतिरेकितया सत्ताधिकरणगुणादिनि
ष्ठाभावप्रतियोगितावच्छेदकत्वस्य द्रव्यत्वत्वे सत्वेपि द्रव्यं विशिष्टसत्वादित्यादौ ना
व्याप्तिः हेत्वधिकरणत्वं हेतुतावच्छेदकसंबंधेन तेन वह्नित्वस्य कालिकसंबं
धेन धूमाधिकरणह्रदादिनिष्ठाभावप्रतियोगितावच्छेदकत्वेपि न वह्निमान्धू
मादित्यादावव्याप्तिः हेत्वधिकरणवृत्तित्वं चाभावस्य दैशिकविशेषणतया सा
च नाभावाभावसाधारणी घटो नास्ती घटाभावो नास्तीति तु व्यवहारतीते प्रतियो
गिता च साध्यतावच्छेदकसंबंधावच्छिन्ना ग्राह्या नातः समवायादिसंबंधावच्छि

न्नप्रतियोगितावच्छेदकत्वस्यवह्नित्वेसत्त्वेपिवह्निमान्धूमादित्यादावव्याप्तिः सामा
नाधिकरण्यंचसाध्यतावच्छेदकसंबंधेसाध्याधिकरणेहेतुतावच्छेदकसंबंधेनवृत्ति
त्वं कंबुग्रीवादिमान्नास्तीतिप्रतीत्यागुरुधर्मस्यापिप्रतियोगितावच्छेदकत्वस्वी
कारात्तद्रूपेणसाध्यतायांव्यभिचारिणिनातिव्याप्तिः साध्यसाधनभेदेनव्याप्तिभेदाद्य
त्रसाध्यतावच्छेदकंनानातत्रप्रतियोगितावच्छेदकतानवच्छेदकंसाध्यतावच्छेदकता
वच्छेदकमित्यादिरीतिर्वाच्यं येनसंबंधेनहेतोःपक्षवृत्तित्वंज्ञायतेतेनसंबंधेनहे
तुमताज्ञानाद्यत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वंसाध्यतावच्छेदकेगृह्यते
तेनसाध्यस्यानुमितिरितिहृदयं विनजने अनुमानमिति स्वानुमितिहेतुः स्वस राम॰ ३२
मवेतानुमितिमात्रहेतुरित्यर्थः तेनपरार्थानु मानस्यापिअनुमि– दिदृक्षायांस्व

समवेतानुमितिजनकत्वेपिनदोषः न्वयोदर्शनेनव्यभिचारज्ञानविरहकृतसहचा
रदर्शनेनव्यभिचारज्ञानविरहस्तर्कादिनातेनतयोर्दर्शनस्यभूयःसुवादर्शनमित्या
दिविकल्पग्रासादिनाःहेतुत्वेपिनक्षतिःपर्वतेधूमंपश्यन्निति एकसंबंधिज्ञानस्यापर
संबंधिस्मारकत्वात् धूमत्वज्ञानस्योद्बोधकविधयाव्याप्तिस्मृतिहेतुत्वादितिभावः
तदनंतरंस्मृत्यात्मकोपनयानंतरंव्याप्त्यंशेअलौकिकंधूमांशेलौकिकज्ञानमुत्पद्य
ते यत्तुस्वयमेवेति प्रयुज्यतइत्यस्यतद्वाक्यजन्यशाब्दबोधमजकंमानसंज्ञानमि
तिशेषः एतदुत्तरंचपूर्वोक्तं यत्त्वितिसंबध्यते तथाचतत्परग्रंथानुमानेयथाश्रुत
वाक्यस्यानुमानत्वाभावेनासंगत्यापत्तेः तथाचायंतस्मात्तथेति इदंचप्राचीनम
तानुरोधेन नव्यमतेतुतद्वानयमितिप्रयोगोद्रष्टव्यः अनेनप्रतिपादितादिति

अनेनैतद्वाक्यजन्यज्ञानेन प्रतिपादितात् व्याप्तिपक्षधर्मत्वैः न बोधितात् प्रतिपद्यते
अनुमिनोति तथा च न्यायप्रयोज्यानुमानं परार्थानुमानमिति फलितं न्यायत्वं
च धातुत्वादिवत् परिभाषाविशेष्यविषयत्वं सामान्यलक्षणपूर्वकं तदवयवा
न् विभजते प्रतिज्ञेति अवयवत्वं च प्रतिज्ञाद्यन्यतमत्वं अत्र चरमपदलक्षणया
न्यतमत्वलाभः पंचत्वोक्तिस्तु दशावयववादिबौद्धादिमतनिरासार्थं उदासीनेषु न्या
यांतर्गतत्वघटितप्रतिज्ञात्वाद्यभावादेव नातिप्रसंगः अथवान्यायांतर्गतत्वे स
ति प्रतिज्ञाद्यन्यतमत्वं तत्वं तद्घटितप्रतिज्ञात्वादेः पंचधात्र वैशेषिकगौरवात् स्म
रहरोऽव्यमित्याद्येकदेशे हरोऽव्यमित्यादावतिव्याप्तिवारणाय प्रतिज्ञाद्यघटक एग्म॰
त्वे सतीति वक्तव्यं प्रतिज्ञात्वं च पक्षतावच्छेदकविशिष्टसाध्यतावच्छेदकविशिष्ट ३३

वैशिष्ट्यबोधकवाक्यत्वं वस्तुतो यत्र यादृशी यादृशी प्रतिज्ञा संप्रदायसिद्धा तादृशप्रति
ज्ञाजन्यबोधानामन्यतमबोधजनकत्वं तत्वं अत एव चैत्रः पचति अयं गौरित्यादौ ता
दृशबोधजनकत्वसत्वेपि पर्वतो वह्निमानित्यादौ न तथात्वं न ह्यत्र ज्ञाने पक्षतावच्छेदका
वच्छिन्ने वह्निमतोऽनतोऽभेदेन विषयत्वादिदमसंगतमिति निरस्तं साध्यतावच्छेद
कमात्रावच्छिन्नविशेष्यताकस्वार्थविशेषणकशाब्दबोधहेतुन्यायावयवत्वं हेतुत्वं
उदाहरणत्वं च व्याप्यत्वाभिमतवद्विशेष्यकव्यापकत्वाभिमतवत्प्रकारकबोध
हेतुन्यायावयवत्वं इतरानन्वितस्वार्थबोधकन्यायावयवत्वं वा मतभेदेन लक्षणद्व
यं बोध्यं नव्यमते उदाहरणस्य केनाप्याकांक्षाविरहात् लक्षणसंगतिः दृष्टांतप्र
योगस्य तु असार्वत्रिकः तस्य समयबंधाधीनत्वात् वीप्सा च यत्पद एव न तु तस्य

देप्रयोजनाभावात् अतएवनवन्दतिरपिप्रायुंक्तयद्यत्पापंप्रतिजहिजगन्नाथनमस्य
तन्मइति उपनयत्वंचप्रकृतपक्षेसाध्यव्याप्यहेतुमत्ताबोधकावयवत्वंनिगमन
त्वंचोपनयार्थविशेष्यकस्वार्थविशिष्टबोधहेतुन्यायावयवत्वंहेतुवाक्येननिष्प्रतियो
गिकस्वार्थान्वियबोधजननासंभवात् प्रतिज्ञासाधूनांगंप्रतिज्ञोत्तरंकुतइत्याकांक्षा
यांनिवर्त्तकंहेतुवचनमितितदपिसाकांक्षाधीनांगंहेताबुक्तेकथमस्यगमकत्वमित्या
कांक्षायांव्याप्तिपक्षधर्मतयोरुपदर्शनप्राथम्यात्तत्प्रदर्शनायोदाहरणं उदाहर
णेनव्याप्तिबोधेपितद्विशिष्टहेतोःपक्षेऽबोधनात्तद्बोधनायोपनयोपन्यासःननुप्र राम०
तिज्ञार्थस्यहेत्वाद्याकांक्षायाउपनयांतेननिवृत्तौनिगमनस्यनस्यनतदंगतेतिचेन्न ३७
उत्पन्नानुमितौबाधितविषयकत्वादिशंकयाऽप्रामाण्यशंकाव्युदासायाबाधित

त्वादिज्ञापनायतदावश्यकत्वात् तज्ज्ञानस्याबाधितत्वादिविशिष्टसाध्यपरेलक्षणया
विशिष्टहेतुज्ञानज्ञाप्यत्वेनाक्षेपाद्वा अत्रायंजरन्नवीनमतयोर्निष्कर्षप्रकारः तथा
हि पंचवाक्यैर्मिलित्वामहावाक्यार्थबोधोजन्यतेतदुत्तरंचतन्मूलकमानसपरामर्शः
तदुत्तरमनुमिति वाक्यार्थबोधस्यवादिजन्यत्वेनाप्रामाण्यशंकाकलंकितत्वात् अ
प्रामाण्यज्ञानानास्कंदितपरामर्शस्यैवानुमितिजनकत्वात् पक्षेसाध्यव्याप्यत्वाव
छिन्नाप्रकारकत्वाच्च तत्रचप्रतिज्ञायांवह्निमदभिन्नःपर्वतस्तदेकदेशेवह्नौदेत्व
पधिमत्ताज्ञानज्ञाप्यत्वान्वयः तत्रचधूमपदस्यधूमत्ताज्ञानज्ञाप्यत्वेचपंचम्याःपंचमा
व एवाज्ञानज्ञाप्यत्वेलक्षणेति उदाहरणेचवह्निपदेधूमव्यापकवह्नौलक्षणावी
प्सातत्पदंचतात्पर्यग्राहकं तथाचधूमवान्धूमव्यापकवह्निमान् इत्यन्वयबो

धः नचैवमुदाहरणस्यव्याप्तिबोधकत्वाभावइतिवाच्यं धूमवतिधूमव्यापकवह्नि
मतोबोधेनव्यापकसामानाधिकरण्यरूपव्याप्तेरपिबोधात् तथाचयमित्युपनये
तुतथात्वशब्दार्थोवह्निव्याप्योधूमः तस्यचपर्वतेसंयोगादिनान्वयःनिपातार्थत्वा
त् तस्मात्तथेतिनिगमनेतुतच्छब्दार्थोवह्निव्याप्योधूमःपंचम्यार्थज्ञानज्ञाप्यत्वंत
थात्वशब्दार्थश्चवह्निमान्तदेकदेशेवह्नौपंचम्यर्थान्वयः तस्यचोपनयनानुषक्तायं
ःपदार्थैःऽभेदेनान्वयोनत्वयंपुनरुपनयार्थविशेष्यकनिगमनार्थविशेषणकोबो
धइति वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निमदभिन्नवह्निमदभिन्नवह्निव्याप्यधूम
वत्पर्वताभिन्नधूमव्यापकवह्निमदभिन्नधूमवदभिन्नधूमज्ञानज्ञाप्यवह्निम राम०
दभिन्नःपर्वतइतिमहावाक्यार्थबोधः नमन्यंतेचेदंनवीनाः उदाहरणस्यके ३५

नाप्यनन्वयाद्विशिष्टवाक्यार्थबोधस्यैवासिद्धेः उदाहरणघटकयोर्यत्तत्पदघ
टितवाक्ययोरपिनैकविशिष्टार्थबोधकत्वं तत्रद्विरुक्तयत्पदेनमहानसत्वमहा
नसान्यत्वादिनोपस्थापनात् तत्पदेनापितद्रूपावच्छिन्नपरामर्शान्महानसंधूम
चवह्निमच्चमहानसान्यद्धूमवद्वह्निमच्चेतिवाक्यार्थचतुष्टयविषयकसमूहाल
म्बनबोधस्यैवोदयात् नचवीप्सयाव्यापकत्वबोधनात्धूमवान्धूमव्यापक
वह्निमानित्याकारकैकविशिष्टार्थबोधएवतत्रोत्पद्यतइतिवाच्यं योयइत्या
देरनन्वितार्थकत्वप्रसंगात् नचद्विरुक्तयत्पदस्यैवव्यापकत्वविशिष्टमेवत
स्यार्थस्तस्यचाभेदेनसाध्येन्वयइतिवाच्यंसुंदरोदंडेत्यादौदंडादौसुंदराभेदा
न्वयबोधानुत्पत्तेःसमासत्वघटीयत्वकृदुपस्थाप्येऽर्थेसमस्तनामार्थाभेदान्वयस्यानु

त्यन्तत्वात् सापेक्षत्वेनासमस्तत्वात्साध्यपदोत्तरं तद्धितानुत्पत्त्यापत्तेश्च तस्मात्पूर्वोक्ति
एवसमूहालंबनरूपोबोधः व्यापकताबोधश्च तन्मूलकोमानसः साध्यपदस्यसा
धनव्यापकत्वविशिष्टेलाक्षणिकत्वेनशाब्दोवा नवधूमादिकमुद्देश्यतावच्छेदकी
कृत्यव्यापकत्वविशिष्टसाध्यबोधउपेयतां यत्तत्पदस्यतात्पर्यग्राहकत्वेनवै
धर्म्याभावादितिवाच्यं चैत्रोजानातीत्यादिन्यायांतर्गतियःकरोतिसजानातीत्या
दौधर्मिणोलाभेनसाध्यानन्वयप्रसंगेनोदाहरणाभासताप्रसंगादित्यादिब
हुतरमूहनीयं तस्मात्प्रतिज्ञाहेत्वोर्विशिष्टैकार्थबोधकत्वं एवमर्थपदानु
षंगपक्षेउपनयनिगमनयोर्विशिष्टैकार्थबोधकत्वं अन्यथाऽपृथगेवेति राम० ३६
वस्तुतःऽननुषंगपक्षेपिउपनयस्यायंपदार्थमात्रेनिगमनार्थान्वयमात्रेणो

पकृत्यतयाविशिष्टार्थेनिगमनार्थान्वयेतात्पर्याकल्पनादितितत्त्वं विभजते
लिंगमिति केवलान्वयिनिविप्रतिपन्नंप्रतितत्क्रमेणविभागकरणाशक्य
त्वादाह अन्वयीति अन्वयेनव्यतिरेकेणचेति अन्वयेनअन्वयसहचारेण
व्यतिरेकेसहचारेण तथाचअन्वयसहचारेणयज्ज्ञानग्राह्यव्याप्तिकत्वंअन्वय
व्यतिरेकित्वं अन्वयसहचारमात्रग्राह्यव्याप्तिकत्वंकेवलान्वयित्वं व्यतिरेकसह
चारमात्रग्राह्यव्याप्तिकत्वंकेवलव्यतिरेकित्वं यथाश्रुतेकेवलव्यतिरे
कस्यापिअन्वयव्यतिरेकव्याप्तिमत्त्वेनासंगतेः दृष्टांताभावदर्शनासंगतेश्च॥
केवलान्वयिनिचविपक्षव्यावृत्तत्वंचतुरूपमेवगमकं केवलव्यतिरेकिणिच
चसपक्षवृत्तित्वरहितंचतूरूपमेवगमकंननुकेवलान्वयिनिसंदेहाभावा

तत्कथमनुमितिरितिचेन्न प्रमेयत्वंघटनिष्ठात्यंताभावप्रतियोगिमन्नवेतिसंश
यस्यैवप्रसिद्धेः तस्यापिसाध्यधीप्रतिबध्यत्वात् प्रमेयत्वमत्यंताभावप्रतियोगी
तिभ्रम्यतःसंदेहस्यान्येननुकेवलान्वयिनिपक्षसत्वसपक्षसत्वविपक्षासत्वाबाधि
तत्वाऽसत्प्रतिपक्षितत्वरूपपंचरूपोपपन्नत्वाभावेनकथंगमकताऽन्यथाऽबा
धितासत्प्रतिपक्षितत्वरूपविकलमपिगमकंस्यादितिचेन्न विपक्षव्यावृत्तत्वघ
योविपक्षवृत्तित्वशंकानिरासकतयैवोपयोगित्वेनप्रकृतेचविपक्षाभावेनतद्वृ
त्तित्वशंकानुदयात् अन्वयव्यतिरेकिण्येवपंचरूपोपपत्यपेक्षणात् व्यतिरेक
व्याप्तिज्ञानंचसाध्याभावव्यापकसाधनाभावाभावत्वज्ञानंसाध्याभावव्यापक ग॰मू॰ ३७
तयाभासमानोयःसाधनाभावस्तत्प्रतियोगितयापक्षेलिंगज्ञानात्मकानुमानेन

साध्यासिद्धेरनुनविकत्वात् सदिग्धेति साध्यप्रकारकसंदेहविशेष्यइत्यर्थ
ः निश्चितसाध्याभावेति साध्याभावप्रकारकनिर्णयविशेष्यइत्यर्थः साध्यसं
देहःपक्षतेतिप्राञ्चः संदेहानांचसाध्यवत्तानिर्णयप्रतिबंध्यत्वेनसंग्रहःपक्ष
ःसाध्यवान्नवापक्षेसाध्यंनवेत्यादिसंदेहानांसाध्यवत्तानिर्णयप्रतिबध्य
त्वात् प्राचीनमतेसमानविषयत्वेनैवविशिष्टबुद्धिबाधबुध्योःप्रतिबध्य
प्रतिबंधकभावादितिवदंति नवीनास्तु साध्यनिर्णयाभावदशायांमनुम
यमानायाःऽनुमितेरनुनविकत्वात् सिसाधयिषाविरहविशिष्टसिध्यभा
वएवपक्षतेत्याहुः प्रसंगात्सव्यभिचारविरुद्धप्रकरणसमसाध्यस
मातीतकालाहेत्वाभासाइतिसौत्रक्रमानुरोधात्हेत्वाभासान्विभजते॥

सव्यभिचारेत्यादिना प्रकरणसमः सत्प्रतिपक्षः साध्यसमोऽसिद्धः अतीतकालो बाध
ः हेत्वाभासत्वंच सव्यभिचाराद्यन्यतमत्वं क्रमः प्राप्तं सव्यभिचारं लक्षयति सव्यभिचा
रोऽनैकांतिक इति अत्र चानैकांतिकसव्यभिचारशब्दौ पर्यायौ पुरुषभेदापेक्षया
लक्ष्यलक्षणत्वेनावस्थितौ यस्यानैकांतिकपदार्थोऽप्रसिद्धः प्रसिद्धश्च सव्यभि
चारपदार्थस्तं प्रत्यनैकांतिक इति लक्ष्यनिर्देशः सव्यभिचार इति लक्षणं तदर्थ
श्च सव्यभिचारपदवाच्यत्वं एवं विपरीतमपि साध्याभाववेति साध्येनाभावः सा
ध्याभावविच्छिन्नप्रतियोगिताकः साध्यवद्भेदः तेन न कपिसंयोगीतत्वादित्यावति
व्याप्तिउपाधेरसांकर्येणोपाधेयसांकार्यस्यादोषत्वाच्चैतस्य विरुद्धसाधारण्ये राम० ३८
पदोषः एतस्य व्यापकत्वग्रहविरोधित्वमेव दूषकताबीजं असाधारणलक्षय

ति सर्वेत्यादि सर्वेति सामान्याभावपरिचयाय सपक्षः साध्यवान् तद्व्यावृत्तत्वं तद
वृत्तित्वं तथा च साध्यवद्वृत्तित्वसामान्याभाववत्त्वमसाधारणत्वं एतस्य तु सामाना
धिकरण्यग्रहप्रतिबंधो दूषकताबीजं तत्र हेत्वाभासव्याप्यस्यापि प्रायशस्तस्त
हेत्वाभासत्वं बाधव्याप्यं तु न तथा तस्य प्रकरणसमत्वात् प्रकरणसमव्याप्यं
न तद्धेत्वाभासोऽविरोधित्वादिति अनुपसंहारिलक्षणमाह असमन्वयव्यति
रेकेति यद्धेतुकव्याप्तिग्रहानुकूलं सत्सहचारज्ञानं अन्वयवीषयकं व्यतिरेकि
विषयकं च यदवच्छिन्नाधिकरणांतर्भावेन यत्र नास्ति तदा स हेतुरनुपसंहारीत्य
र्थः ननु अनुमितिविरोधित्वेन बाधप्रतिरोधविरोधानां अन्येषां चानुमितिक
रणविरोधित्वेनैकैव हेत्वाभास द्वैविध्यापत्तिरिति चेन्न स्वतंत्रेच्छस्य नियोगपर्य

नुयोगानर्हत्वात् मणिकृतादूषितमपि लक्षणं दोषोद्धारं मनसि निधाय विरुद्धलक्ष
णमाह साध्याभावेति साध्याभावव्याप्तत्वं च स्वसमानाधिकरणात्यंताभावप्र
तियोगितानवच्छेदकसाध्याभावत्वकत्वं तेन मणिकृदुक्तसंयोगादिसाध्यक
सद्धेतावतिव्याप्तिनिरासः एतस्य चानुमितिप्रतिबंधो दूषकताबीजं तज्ज्ञा
नं प्रति तदभावव्याप्यवत्ताज्ञानस्यापि प्रतिबंधकत्वात् सत्प्रतिपक्षं लक्षयति
यस्येति बाधोपस्थितिसमर्थपरामर्शकालीनसाध्यसिद्धिसमर्थपरामर्शविशि
ष्टप्रकृतहेतुत्वं एकैकपरामर्शे प्रामाण्यग्रहकाले सत्प्रतिपक्षत्ववारणाय सम
र्थद्वयं अत एव च यत्र भावविवक्षाभावव्याप्यज्ञानमप्रमेति ज्ञानं ततो वह्नितदभा गम॰ ३९
वव्याप्यवत्तानिर्णययोः वह्नेरनुमितिप्रामाण्यज्ञानानारूढत्वं तत्र सत्प्रतिपक्षत्वाप

त्तिरपि निरस्ता प्रथमक्षणे प्रामाण्यग्रहसत्त्वेन परामर्शस्य बोधोपस्थितिसामर्थ्या
भावादिति बोधोपस्थितिसमर्थपरामर्शकालावच्छेदेन साध्यसिद्धिसमर्थपरामर्श
विशिष्टत्वस्य वाच्यत्वात् न चैवं भावपरामर्शकालीनवह्निपरामर्शविशिष्टत्वस्य
परामर्शोत्पत्तिकालावच्छेदेनापि सत्त्वात्तत्कालावच्छेदेन सत्प्रतिपक्षत्वापत्तिः
दूषकताबीजं च परस्परप्रतिबंधादनुमित्यनुत्पाद एव सोयं हेतुरुभयपक्षोऽप्यवर्त्त
यन्नन्यतरस्य निर्णयाय न कल्पत इति नापात् रक्तकोशकारास्तु संशयात्मिकाम
नुमितिमंगीकुर्वंति असिद्धं लक्षयति असिद्ध इति साधारण्यासाधारण्यानु
पसंहारित्वभिन्ने सति विषयपरामर्शविरोधितावच्छेदकरूपमसिद्धिः तद्वान्
हेतुरसिद्धिः एवं सर्वत्र पक्षतावच्छेदकविशिष्टपक्षग्रहविरोधिरूपमाश्रया

सिद्धिः गगनीयत्वाभाववद्रसवित्त्वं तथेतिलक्षणसमन्वयः प्रकृतपक्षप्रकृत
हेतुमत्ताविरोधिनोज्ञानस्यविषयतयापक्षसाधनोभयवैशिष्ट्यग्रहविरोधिता
वच्छेदकंरूपंस्वरूपासिद्धिः आश्रयासिद्धिव्याप्यत्वासिद्धिवारणायाविरोधिन
इत्यंतं नन्वचाक्षुषत्वाद्यभावविशिष्टशब्दत्वादिकमिति ननूपाधेरपिअनुमि
तिप्रतिबंधकत्वेकथंपंचहेत्वाभासाइत्यतआह सोपाधिकमितिव्याप्यत्वंव्य
भिचरितं प्रसिद्धंयत्रेतिव्युत्पत्त्याव्यभिचारीत्यर्थः तथाचसोपाधौउपाधिनास्व
व्यभिचारेणसाध्यव्यभिचारोन्वयेनव्यभिचारस्यैवतत्रदोषत्वेनपरमुखनिरी
क्षकत्वेनोपाधेर्नहेत्वाभासत्वमितिभावः व्याप्यत्वासिद्धस्तुएतद्भयभिन्नोऽ रामु॰
सिद्धः स्पष्टत्वान्नापंलक्षितइतिभावः उपाधिंलक्षयति साध्यव्यापकत्वेसतीति ४०

यद्धर्मावच्छिन्नसाध्यव्यापकतद्धर्मावच्छिन्नसाधनाव्यापकमित्यर्थः तेनसश्या
मोमित्रातनयत्वाद्वायुःप्रत्यक्षःप्रत्यक्षस्पर्शाश्रयत्वादित्यादौशाकपाकजोद्भूतरूप
त्वादौमुद्गश्यामत्वप्रत्यक्षव्यापकत्वाभावेपिनक्षतिः मित्रातनयत्ववहिर्द्रव्यत्वाव
च्छिन्नसाध्यव्यापकत्वात् बाधंभक्षयति यस्येति यद्धेतुकसाध्याभावः पक्षेप्रत्य
क्षादिनानिश्चितइत्यर्थः तथाचसाध्याभावप्रत्यक्षकत्वंबाधितत्वंपर्यवसितं
इत्यनुमानग्रंथः दोषपंकनिमग्नेयमनुमानसरस्वती समुद्धृतामुकुंदेन
यथामतिविवेचनात् व्याख्यातमनुमानमित्यादिपूर्ववत् उपमितीति नन्व
पमानेनमानांतरंप्रत्यक्षतएवतस्यसिद्धेरितिचेन्न अश्रुतवाक्यस्यापितदुप
त्तेः नन्वियमनुमितिरेवअनुमानमात्रसिद्धार्थकत्वात् तथाहि गवयपदंगव

यत्वविशिष्टवाचकं असति वृत्त्यंतरे तत्र प्रयुज्यमानत्वात् यो यत्रासति वृत्त्यंतरे प्र
युज्यते स तस्य वाचकः यथा गोशब्दो गोजातीयस्य। प्रयुज्यते चायं गोसदृशो गवय
इति नच वृत्त्यंतरं विना प्रयोगः शक्तिमत्तात्वात्तानुमतश्राक्यः इति विशेषणासिद्धिः
गोसदृशो गवय इत्याप्तवाक्यात् सादृश्यविशिष्टे गवयपदप्रयोगः सिद्ध इति विशे
ष्यासिद्धिरप्रेति वाच्यं वृत्त्यंतरस्यानुपपत्तिगम्यत्वात्तदभावे तदभावस्यानिर्णयात्
गवयत्वोपस्थितौ तस्य जातित्वेनाखंडत्वात् सादृश्यस्योपाधित्वेन गुरुत्वाद प्र
तीतेर्गुणानां वनेचराणां प्रयोगापत्तेरिति चेन्न व्याप्त्याद्यप्रतिसंधाने वि
जायमानाया उपमिनोमि नो मिनोमि नानुमिनोमीति विलक्षणानुव्यवसिद्धायाः वि
लक्षणप्रतीतेर्नानुमितित्वमिति तत्करणस्य मानांतरत्वावश्यकत्वात् साध्याप्र राम० ४१

सिद्धेः यत्तदर्थयोरननुगमेन पूर्वानुमानस्यावतारासनवच्च ननु गोसादृश्यविशि
ष्टे गवयपदवाच्यत्वावगाहिज्ञानमुपमानं गोसादृश्यावच्छिन्ने गवयपदवाच्य
त्वावगाहिज्ञानमेवोपमितिः तस्याश्च शाब्दत्वे बाधकाभावः प्रमाणांतरकल्पनापेक्ष
या गोसादृश्यस्य गुरोरवच्छेदकत्वे क्षतिविरहादिति चेन्न गवयत्वप्रकारकशक्तिग्र
हाभावेन तत्प्रकारकशाब्दबोधस्यानुभूयमानस्यापलापप्रसंगात् शक्तिग्रह
शाब्दबोधयोः समानप्रकारकत्वेन कार्यकारणभावादिति सिद्धं प्रमाणांतरेण
तदुक्तमाचार्यैः न्यायकुसुमांजलौ संबंधस्य परिच्छेदः संज्ञायाः संज्ञिना स
ह प्रत्यक्षादेरसाध्यत्वादुपमानफलं विदुरिति तदेतत्सकलमभिसंधायाः
ह संज्ञेति गवयो गवयपदप्रवृत्तिनिमित्तवानित्युपमितिं तु मणिकृतः उ

पमितित्वं जातिविशेषः नचासिद्धिः कारणविशेषे कार्यवैजात्यमावश्यकमिति
कारणव्यंग्यत्वादित्यत एव तथा च तद्वत्त्वमेव लक्षणं बोध्यं प्रसिद्धसाधर्म्यात्साध्यसा
धनमुपमानमिति सूत्रस्यापि प्रसिद्धस्य पूर्वप्रमितस्य गवादेः साधर्म्यात्सादृश्या
त्तज्ज्ञानात्साध्यस्य गवयादिपदवाच्यत्वस्य साधनं सिद्धिरुपमानमुपमितिरिति
यत इत्यध्याहारेण च करणमित्यर्थात्प्रकृते एव पर्यवसानं बोध्यं वैधर्म्योप
मितिमन्यंते टीकाकृतः यथाऽतिदीर्घत्वादिपश्वंतरवैधर्म्यज्ञानादुष्ट्रे कर
नपदवाच्यताग्रहः केचित्वन्योप्युपमानविषय इति नाप्यं तदर्थश्च शक्तिप
रिच्छित्यन्य इत्यर्थं मत्वा मुद्गपर्णसदृश्योषधी ज्वरं हंतीत्यतिदेशवाक्यार्थज्ञान
जन्याया उपमितेः कार्यकारणभावपरिच्छेदकत्वमिति वदंति अत्र च सादृश्यवि

राम०
४२

शिष्टपिंडदर्शनं करणं तदुद्बोधकीनतेन जन्यातिदेशवाक्यार्थस्मृतिः व्यापार इ
ति मिश्राः अतिदेशवाक्यार्थधीः करणं तदर्थस्मृतिर्व्यापारः सादृश्यपिंडदर्शनं
सहकारीति केचित् वाक्यज्ञानं करणं वाक्यार्थानुभवादिकं व्यापार इत्यपरे ए
तत्सर्वमतिदेशवाक्यार्थस्मृत्यव्यवहितोत्तरं सादृश्यविशिष्टपिंडदर्शने उपमित्यनु
पपत्त्यातिदेशवाक्यार्थज्ञानोत्तरं पिंडदर्शने तदनुपपत्त्या चित्रलेखादिना तद
नुपपत्त्या च दुष्टमित्यभिप्रेत्य सादृश्यज्ञानं करणं सादृश्यपिंडदर्शनं व्यापार इ
त्यभिप्रायवानाह तत्करणमित्यादि सदृशं पश्यतीत्यंतेन असाविति पुरोवर्ती
गवय इत्यर्थः तथा च गवयो गवयपदवाच्य इत्युपमितिरित्यर्थः अन्यथास
मानप्रकारकत्वेन शक्तिज्ञानशाब्दबोधयोः कार्यकारणभावादसंगतेरित्युत्त

न्नं उपमानपरिच्छेदः उपमेयो निरूपितः मुकुंदेन बुधप्रीत्यै तेन तुष्यतु शंकरः
व्याख्यातमुपमानमिति पूर्ववत् आप्तोपदेशः शब्द इति सूत्रं प्रयतोऽनुवदन्
शब्दलक्षणमाह आप्तेति लक्ष्यनिर्देशः प्रमाणं शब्द इति हि तस्यार्थः आ
प्तवाक्यं इति लक्षणं आप्तस्तु प्रकृतवाक्यार्थयथार्थज्ञानवान् तस्यार्थः प्रयुक्त
त्वं तादृशज्ञानजन्यवाक्यत्वमिति तु फलितोर्थः वाक्यप्रयोगे वाक्यार्थज्ञानस्य
हेतुत्वात् लक्षणसंगतिः ज्ञानकरणत्वपक्षे ज्ञानपदं लक्ष्ये लक्षणे चाध्याहार्यं
सत्रे चोपदिश्यतेऽनेनेत्युपदेशो वाक्यज्ञानमित्याह टीकाकृत् आकांक्षायोग्य
तासन्निधिमान् शब्दः प्रमाणमिति प्रमाणतत्त्वबोधे वर्द्धमानोपाध्यायाः ननु तर्क० ४३
शब्दो नमानांतरं अनुमानसिद्धार्थकत्वात् तथाहि गौरस्तित्ववान्स्वधर्मिकास्ति

त्वान्वयबोधानुकूलाकांक्षादिमत्पदस्मारितत्वात् घटवत् अस्तिपदसमभिव्या
हृतगोपदस्मारितत्वात् चक्षुर्वत् इत्यनुमानेन प्रकृतार्थसिद्धेः न च हेत्वसिद्धिः प
दानामेकवाक्यतापन्नत्वरूपसमभिव्याहृतत्वनिर्णयस्य सिद्धांतेपि आवश्यकत्वा
त् स्वार्थानुमाने स्वरूपसतो व्यभिचारस्याकिंचित्करत्वेन विनष्टेनाविनिवाघ
ट्चक्षुरादौ तत्सत्त्वेपि न दोषः समानप्रकारकज्ञानस्यैव व्यभिचारज्ञानस्य विरो
धित्वेनान्यविधव्यभिचारज्ञानसत्त्वेप्यन्यविधव्याप्तिज्ञानसंभवाच्चेतिचेन्न स्मारि
तत्वाभावग्रहदशायामनुभवसिद्धस्य बोधस्यापलापप्रसंगात् अस्मारितस्या
पि स्मारितत्वग्रहदशायामननुभूयमानस्यापत्तेः तादृशबोधस्यानुमितित्वे
नानुव्यवसीयमानत्वात् प्रत्युत गौरस्तीति वाक्यादस्तित्वेन गौः श्रुतो न त्वनुमि

तदस्त्यनुभवाच्च श्रोतव्योमंतव्यइत्याद्यनुरोधेनशुद्धात्मतावच्छेदकत्वस्यप्रागुक्तैक
स्यपितुमुचितत्वात् एतेनतादृशबोधस्योपनीतनानात्मकत्वमपिनिरस्तं प्रकारांत
रेणोपस्थितस्योपनयवशादवगाहितापत्तेश्चः नापिस्मृतिः समानाकारानुभवसं
स्कारयोरसत्वादितिसिद्धंप्रमाणांतरत्वं वाक्यमिति तत्त्रिविधं विधिनिषेधार्थ
वादभेदात् क्रियागतेष्टसाधनताबोधकवाक्यंविधिः पचेनेत्यादिवाक्यंधा
त्वर्थपाकादेर्नबोधकं नित्येप्यस्मन्मतेब्रह्मलोकावाप्तिप्रत्यवायानुत्पादरूप
फलसाधनताबोधकत्वात्संगतिः तत्रविधिश्चतुर्विधः उत्पत्तिविधिर्विनियो
गविधिरधिकारविधिःप्रयोगविधिश्चेति तत्रकर्मस्वरूपमात्रबोधकोविधि रामं० ४४
रुत्पत्तिविधिःसचयथाऽऽग्नेयोऽष्टाकपालोभवतिसोमेनयजेतेत्यादि द्रव्यदेव

तारूपकर्मस्वरूपमात्रबोधकत्वात् परार्थतयान्यविधिर्विनियोगविधिः यथा
दध्नाजुहोतिहोमार्थतयादधिविधानात् स्वयंचापूर्वविधिनियमविधिपरि
संख्याविधिभेदात्त्रेधा विधिंविनाकथमपियदोचरप्रवृत्तिर्नोपपद्यतेऽसाव
पूर्वविधिः नियतप्रवृत्तिफलकोविधिनियमविधिः स्वविषयादन्यत्रप्रवृत्ति
विरोधविधिः परिसंख्याविधिः तत्रक्रमेणोदाहरणानि व्रीहीन्प्रोक्षतिव्रीहि
नवहंति इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइति तत्राद्येविधिंवि
धिंविनाप्रोक्षणप्राप्त्यभावात् द्वितीयेपुरोडाशनिष्पादकव्रीहिवैतुष्यद्वारा
यागोपकारकेऽवघातवत्तत्परिहारेणनखविदलनादिनापिप्रवृत्तिप्रस
क्त्याप्रवृत्तिनियमोनस्यादितितादृग्विधेःप्रवृत्तिनियमनिर्वाहात् ततीयेमं

अस्यरशनाग्रहणप्रकाशकतयामंत्रलिंगेनगर्दभरशनादानेपिविनियोगस्तानेनतद
द्दानकालेपिमंत्रपाठापत्तेरेतद्विधिनाअश्वरशनाग्रहणएव तत् मंत्रविनियो
गेननिराकांक्षतयागर्दभरशनाग्रहणेनतद्विनियोगइतिसंगतिः फलसंबंध
बोधकोविधिरधिकारविधिः अतएवफलभोक्तृत्वसमानाधिकरणंकर्तृत्व
मधिकारइतिगीयते यथाज्योतिष्टोमेनस्वर्गकामोयजेतेति सांगप्रधानक
र्मप्रयोगैक्यबोधकःपूर्वविधिनियमेलनरूपःप्रयोगविधिः सचश्रौतइत्येके
कल्प्यइत्यपरे कर्मस्वरूपंचद्विविधं गुणकर्मअर्थकर्मच तत्रक्रतुकारकाण राम०
याश्रितंविहितंगुणकर्म तदपिचतुर्विधं उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् त ४५
त्रयूपंतक्षतीत्याद्यं तक्षणेनसंस्कारविशेषविशिष्टयूपोत्पत्तेः स्वाध्यायोध्येत

व्यइतिद्वितीयंअध्ययनेनविद्यमानस्यैवस्वाध्यायस्यप्राप्तेः व्रीहीनवहंतीत्यादितृती
यं अवघातादिनाव्रीहीणांविकृतेः व्रीहीन्प्रोक्षतीत्यादिचतुर्थं प्रोक्षणादिनाव्रीहीणां
संस्कारात् एतच्चतुष्टयमंगमेव एवंक्रतुकारकाण्यनाश्रित्यविहितमर्थकर्मतच्च
द्वितीयं अंगंप्रधानंच अन्यार्थमंगं अनन्यार्थंप्रधानं अंगमपिद्विविधं सं
निपत्योपकारकमारादुपकारकंच तत्रप्रधानस्वरूपनिर्वाविधीयतेयत्त
त्यर्थंहमाद्यं फलोपकारिद्वितीयं एवंसंपूर्णांगयुक्तोविधिःप्रकृतिः विकलांग
संयुक्तोविधिर्विकृतिरितिसंक्षेपः क्रियायांबलवदनिष्टाननुबंधीष्टसाधनत्वाना
वाबोधकंवाक्यंवाक्यंनिषेधवाक्यं यथानकलंजंभक्षयेत् रात्रौश्राद्धंनकुर्वीतेति
विधायकत्वाद्भिन्नंवाक्यमर्थवादः सचत्रिविधः गुणवादोनुवादोभूतार्थ

वादश्चेति तत्रक्तकार्यकारित्वादिगुणेनतादात्म्यादिवादोगुणवादः यथायजमानःप्
स्तरइत्यादिः प्रमाणांतरेणनिश्चितार्थकोनुवादः यथावायुर्वैक्षेपिष्ठेत्यादि अत्र
यन्निन्नोःपर्यवादोभूतार्थवादःयथास्वर्गार्थवादोयन्नदुःखेनसंभिन्नंनचग्रस्तमनं
तरंचाभिलाषोपनीतंचतत्सुखंस्वःपदास्पदंइत्यादि इतिसाध्यत्वेष्टसाधनत्वबल
वदनिष्टाननुबंधित्वानिविशिष्टानिवाविध्यर्थइतिन्यायसिद्धांतः नव्यास्तुलिङो
भिधानज्ञानंप्रवर्तकं तथाहि प्रवृत्तिर्द्विधा स्वेच्छाधीनापरेच्छाधीनाच तत्राद्या
यामिष्टसाधनत्वज्ञानंकारणं अंत्यायांचराजगुर्वादिराज्ञाप्रेषणादिधीः तासांच
परनिष्टप्रवर्तनाज्ञानत्वेनहेतुत्वं तथाच यजेतेतिविधिप्रयोज्यप्रवृत्तौराजा रम०
दिवद्विधिरेवप्रवर्तकः अज्ञातादेरचेतनत्वात्तत्त्वाभावेनलिङ्निष्ठप्रवर्तनाभि ४६

धारूपैवतन्निष्ठत्वंचास्याःतादात्म्यसंबंधेनतन्मतेधर्मधर्मिणोरभेदात् वर्णानांनि
त्यत्वेनतस्याअपिनित्यत्वं साचलिङ्ज्ञाप्याइयमेवचशाब्दीभावनेत्युच्यते आ
र्थीभावनाचयत्नचेष्टादिसाधारणीयत्नरूपैववा आख्यातसामान्यवाच्या अत्र
यसाधारणंभावनात्वंचांशत्रयवद्व्यापारत्वरूपंइदमेवचतत्पदप्रवृत्तिनिमि
त्तंतज्ज्ञानस्यचकिंकेनकथमितिकर्मकर्तव्यताकांक्षोत्थापकत्वं तत्राद्यायांएकप
दोपात्तत्वप्रत्यासत्त्याकर्मत्वेनअर्थभावनारूपापुरुषप्रवृत्तिरेवान्वेति प्रव
र्तनात्वेनस्वस्मिन्लिङ्पदशक्तिग्रह करणत्वेन अगृहीतलिङ्पदशक्ति
कस्याप्रवृत्तेः स्तुत्यर्थवादश्चेतिकर्तव्यता सचफलादावुत्कटत्वरूपप्राशस्त्य
ज्ञानद्वारोपजायते बलवद्द्वेषमपनयन्बलवदनिष्टाननुबंधित्वज्ञानद्वारोपयु

ज्यते इंदूपायांचस्वर्गोनाश्यो यागःकरणं यागेकरणत्वंफलोद्देशप्रवृत्तपुरुषप्र
कृतिविषयत्वं प्रयाजादीतिकर्त्तव्यता कृतवदनिष्टाननुबंधित्वज्ञानंचप्रतिबधकं
तदभावस्वरूपसन्नेवकरणं व्यापारेपूर्वोक्तयागकरणकत्वबोधेयागेफलोद्दे
शप्रवृत्तकृतिविषयत्वबोधेनतत्रकृतिसाध्यत्वस्याप्यवगमात्नविधेस्तत्रशक्ति
: अधिकमन्यत्रानुसंधेयं मुंगुरवस्तुकृतिसाध्यताज्ञानंचिकीर्षाद्वाराप्रवर्त्तकं
नत्विष्टसाधनत्वज्ञानं संध्यावंदनादौप्रवृत्त्यनापत्तेः एवंचविधेरपितत्रैवशक्ति
: चिकीर्षाचकृतिसाध्यत्वप्रकारिकाधर्मिणोत्वेछा तथाचतत्तद्धर्मावछिन्नसा
ध्यकप्रवृत्तित्वावछिन्नविशेष्यककृतिसाध्यत्वज्ञानंहेतुः एवंतत्तद्धर्मावछिन्न राम०
विशेष्यककृतिसाध्यत्वप्रकारिकेछां प्रतितत्तधर्मावछिन्नविशेष्यककृतिसाध्य ४७

ताज्ञानंहेतुः संवादीछायाःस्वप्रकारप्रकारकधीसाध्यत्वनियमात् चिकीर्षा
भिन्नेछायांचसुखदुःखाभावत्वज्ञानं प्राकीनवतिन्नोछाचननवत्येवेतन्मते
अतएवोक्तंदृष्टसाध्येसुखेहीछादृष्टमपिविषयीकरोतीति मणिकारेण न
न्विष्टसाधनताज्ञानस्याहेतुत्वेनिष्फलतयात्तानचेत्यवंदनादावपिप्रवृत्तिः नचत
दानीं प्रवृत्त्यभावेनतत्कालीनतत्पुरुषीयकृतिसाध्यताज्ञानस्यविरहादेवनप्रवृत्तिः
तन्मतेऽन्यथाख्यात्यनावादितिवाच्यं गुरुतरभारेणोत्तोलनादेःकृत्यसा
ध्येविसंवादीछाप्रवृत्त्युपपत्तयेज्ञायमानताहृश्यकृतिसाध्यत्वासंसर्गग्रहस्यैवहे
तुतायाःस्वीकर्त्तव्यत्वेनतत्रभ्रमात्प्रवृत्त्यापत्तेर्दुर्वारत्वादितिचेन्न यतःफलविशे
षोद्देश्यकप्रवृत्तौ एककालावछिन्नसामानाधिकरण्यसंबंधेनबंधेनबलवद

निष्टाननुबंधित्वेष्टसाधनताज्ञानविशिष्टज्ञायमानेदानींतनताहृष्टकृतिसाध्यतासंस
र्गाग्रहत्वेन जनकत्वं अत एव च विषभक्षणेन प्रवृत्तिः इत्थमेवेष्टसाधनत्वस्मर
णकालीनकार्यतास्मरणजातमात्रबालस्य स्तनपानादौ प्रवृत्तिश्चोपपन्ना नवीन
ज्ञानसामान्यसामग्र्यास्तन्मते वर्त्तमानकालनामकत्वस्वीकारेण स्मरणस्येदानींतन
त्वविषयकत्वापत्ते जन्मांतरस्येदानींतनत्वानवगाहित्वेपि नानुपपत्तिः फलानु
द्देश्यकप्रवृत्तौ च शुचितत्कालजीवित्वप्रतिबंधनावच्छिन्नकार्यताज्ञानत्वेनैव हेतु
ता नित्यत्वज्ञानमपि सहकारी तेन शुचितत्कालजीवित्वप्रतिसंधानजन्यकार्यता
ज्ञानानिष्फलत्वेन ज्ञायमानचैत्यवंदनादौ प्रवृत्तिः तत्रापि नित्यत्वासंसर्गाग्रह शतृ०
सत्त्वे त्विष्टैव सेति समासः संकेतनिन्नायामनिधार्यमानानात्स्वेच्छाधीनप्रव ४८

त्तौ कृत्यत्वोक्तकाम्यकारणताकेष्टसाधनताज्ञानादेव प्रवृत्त्युपपत्तेः रागातादि
ज्ञानस्यापीष्टसाधनताज्ञानद्वारा प्रवृत्तिप्रयोजकत्वादग्रमतं निर्युक्तिकमेव चरम
पि इष्टसाधनताज्ञानावच्छिन्नकार्यताज्ञानत्वेन कार्यताज्ञानत्वेन कार्यताज्ञाना
वच्छिन्नेष्टसाधनताज्ञानत्वेन च विनिगमनाविरहेण कार्यकारणभावकल्पने न ब
लवदनिष्टाननुबंधित्वज्ञानमादायापि विनिगमनाविरहेण कारणतानंत्यात्॥
कार्यतावच्छेदकगौरवस्य च दुर्वारतया शुचितत्कालजीवित्वप्रतिसंधानादेश्चा
वच्छेदककोटिनिवेशेन नित्यत्वज्ञानादेः कारणताकल्पनेन च हेयमेव प
रंतु चिकीर्षाद्वारा कृतिसाध्यत्वेष्टसाधनत्वबलवदनिष्टाननुबंधित्वानां ज्ञानं
परस्परसहकारेण प्रवृत्तिहेतुः चिकीर्षा च कृतिसाध्यत्वप्रकारकेच्छा तथा च स

समवायसंबंधेनपाकत्वावच्छिन्नविशेष्यककृतिसाध्यत्वप्रकारिकेच्छांप्रतितदवच्छिन्न
विशेष्यककृतिसाध्यत्वप्रकारकज्ञानत्वेनजनकता। इत्थंनीतनत्वंमदीयत्वंचकृ
तौविशेषणं तेनवाऽनस्यनयोवरस्यप्रवृत्तिः नवान्यदीयकृतिसाध्यताज्ञानेप्र
वृत्यनदयेनव्यभिचारः एतदंतानवीनविधेःशक्याभावेपितन्मूलकोशिच्यमा
नसताहशबोधस्यैवप्रवृत्त्यादिजनकत्वं यदाहमणिकारः विधिजन्यज्ञान
जन्यंज्ञानंप्रवर्त्तकमिति कृतिश्चप्रवृत्तिरूपा अतोजीवयोनिकृतिसाध्ये
प्राणपंचकसंचारेनप्रवृत्तिः नचकृत्यसाध्यताज्ञानस्यचिकीर्षाप्रतिबंध
कत्वकल्पनयैवोपपत्तौकृतिसाध्यताज्ञानस्यकारणत्वंकिमर्थमितिवाच्यं राम० ४९
तस्यप्रतिबंधकत्वेतदभावस्यकारणत्वेगौरवात् अनुपस्थितकृतिसा

ध्यत्वप्रकारकेच्छायाअनुभवविरुद्धत्वात्तत्प्रकारकज्ञानकारणत्वस्यावश्यकत्वाच्च पा
कत्वाच्च पाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्यतत्कृतिसाध्यत्वप्रकारक
तदप्रकारकेच्छासाधारणंपाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वमेवजन्यतावच्छे
दकंसामान्यसामग्री।विरहादेवकेवलकृतिसाध्यताज्ञानकालेनचिकीर्षाप्रवृत्त्यो
रापत्तिः मुख्यत्वनिवेशाच्चनपाकसाध्यसुखत्वादिप्रकारकेच्छायांव्यभिचारः॥
समभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकावच्छिन्नसाधनत्वएवविधि
धिप्रत्ययस्यशक्तिः अन्यथास्वर्गकामोयजेतेत्यादितःतात्पर्यभ्रमादिष्टांतरसा
धनताबोधप्रसंगः तथाचविश्वजितायजेतेतिवदरहरहःसंध्यामुपासीतेत्
यादावपिफलकामवाचकपदाध्याहारः सचनरकनिवृत्तिब्रह्मलोकावाप्ति

कावाम्निकामस्त्याकारः नित्यकाम्येनिष्टनिवृत्तिसंबलितनत्तत्फलकामएवाधिका
रीसमुच्चितफलकामाधिकारिकर्मणांएकैवफलकामनासहकारिणापितत्तत्का
मनाविषयफलाजनकत्वोपगमाच्च प्रत्यवायपरिजिहीर्षामात्रेणमुमुक्षुणांत
त्तत्कर्मनिष्ठानोपपत्तिः श्रुतिनाकरणेप्रत्यवाय इत्यत्रैवनिंदार्थवादतात्पर्येण
कामनाशून्यस्यैचादिमतांसंध्यावंदनाद्यकरणेप्रत्यवायोत्पत्तिः त्रिकालस्तव
पाठादिवत्कामनासद्भावनैयत्यकल्पनाद्वा एवंचग्रहणश्राद्धादेर्नित्यत्वनैमि
त्तिकत्वेइवसंध्यावंदनादेर्नित्यत्वकाम्यत्वेउरीकरणीये इष्टंचेदानींतनेच्छाविष
यः तेनतृप्तस्याभोजनेनप्रवृत्तिः इच्छाविषयत्वंचस्वरूपसदेवनतुतदंशेन राम०
ज्ञानमपेक्षितं तथासतिफलस्यसिद्धत्वेनेच्छाविरहेपिइष्टत्वज्ञानसंभवात् ५०

सिद्धेदनादेरपिउपायेच्छाप्रसंगः उपायेच्छायांफलेच्छाया अपिहेतुताबोध्या परस्प
रसहकारेणचानयोःकारणत्वं नचैकदासाध्यत्वसाधनतयोर्विरोधः तयोरेकदा
एकत्रासत्वरूपविरोधेपिएककालीनरूपावच्छेदकमनंतर्भाव्यैकधर्मिण्यैकज्ञाने
नाप्यवगाहनेबाधकाभावात् इष्टंचात्रसुखंदुखाभावोवासाधनत्वंचक्षेमसा
धारणंतेनरोगेतुविनाशादेरपिसुखाभावसाधनत्वात्तत्रोचरेच्छाप्रवृत्तिः मधुवि
षसंपृक्तान्नभक्षणादौइच्छाप्रवृत्त्योरनुदयात् बलवत्त्वंचद्वेषगतोजातिविशेषः
तन्नियामिकाचसामग्र्यननुगतैव तेनैकस्यपुंसःकदाचिदुत्कटोऽनुकट
श्चोपपद्यते तदभावादेवचरागांधस्यापिनरकगोचरद्वेषसत्त्वेपिअगम्यागम
नादौप्रवृत्तिः इत्थमेवचश्येनेनाभिचरन् यजेतेत्यादौप्रवृत्तिः मणिकृतस्तु श्ये

गादौ कृतिसाध्यत्वे सति इष्टसाधनत्वमेव योग्यतयान्वेति न तु बलवदनिष्टाननुबंधि
त्वमपि अयोग्यत्वादित्याचार्याः एतद्रूपादेव प्रत्येकं शक्तिरिति गम्यते अन्यथा पदा
र्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधादसंगत्यापत्तेः वस्तु
तः श्येनत्वसामानाधिकरण्येन बलवदनिष्टाननुबंधित्वस्यान्वयान्न विधेरप्रामा
ण्यं ज्ञानतायि विधफलकस्य श्येनस्य बलवदनिष्टजनकत्वादिति उक्तदानुक्त
दंडुः खविषयकसमूहालंबनरूपानंगीकारान्नांशित्वं तत्रापीदानीतनत्वनि
वेशादुः खितस्य विषभक्षणे प्रवृत्त्यनुपपत्तिः नकलंजं भक्षयेदित्यत्र च विध्य
र्थबलवदनिष्टाननुबंधित्वाभाव एव बुध्यते कलंजभक्षणस्य कृतिसाध्यत्वात् राम०
इष्टसाधनत्वाच्च हृद्यादलरसः श्राद्धं पितृभ्यः प्रीतिमावहन् इति स्मृतौ व्याधिकर ५१

णयाश्राद्धापि पितृतृप्तेः फलत्वोक्तेर्वा तत्रोद्देश्यत्वसंबंधेनापि योगादेः फलं प्रति
कारणत्वं कल्प्यते गयाश्राद्धादावप्येवमेव अत एव शास्त्रादेशितं फलमनुष्ठात
रीत्युत्सर्ग इति प्राचीनवादः पितृणां मुक्तत्वे तु स्वस्य स्वर्गादिः फलं यावन्नित्यनैमि
त्तिकानुष्ठानस्य सान्यतः स्वर्ग एव फलकत्वात् तदधिष्ठातृदेवताप्रीतिर्वा पि
तृशब्देनाः नेलोपचारेण तेषामपि बोधात् अत एव वसुरुद्रादित्यस्वरूपाणां पि
तृपितामहप्रपितामहानामिति साधु संगच्छते साधनत्वं च साक्षात् परंपरासा
धारणं स्वजन्योपाधिः पदार्थांतरं वा तच्च योगादेराशुविनाशितया कालांतर
भाविस्वर्गादेः साक्षादसंभवादिति द्वारापेक्षायां दृष्टाभावेऽदृष्टं कल्प्यत इति न्या
यसिद्धांतः वाच्यमेव तादृशादेरिति गुरवः तथा हि तत्कामकृतिसाध्यतान्

येनतत्कामनाविषयसाधनत्वंयोग्यतान्वयप्रयोजकरूपस्यैवयोग्यत्वात् अ
न्यथाकामिप्रवृत्तिपरात्स्वर्गकामोयजेतेतिवाक्यात्प्रवृत्तिनिर्वाहकंकार्यंनाशा
नेवाच्यंतच्चपाकेपिसंभवतीतिस्वर्गकामोयजेतेतिवत्स्वर्गकामःपचेति
वाक्यस्यापिप्रामाण्यप्रसंगात् सामान्यज्ञानस्यकिंचिद्विशेषज्ञाननैयत्येन
साक्षात्साधनबाधेपरंपरासाधनत्वंवाच्यंतच्चनतदृष्टकापूर्वोपस्थितिंवि
नेतितद्वाच्यताऽवश्यकत्वं तथाच्यनाचकार्यत्वेनतस्यचसविषयत्वोपग
मात्यागस्यतत्रविषयतयास्वर्गकामस्यचनियोज्यत्वेनान्वयः तत्रादौया
गविषयकंस्वर्गकामनियोज्यकंकार्यमितिधीः नियोज्यत्वंचकामनाविशि सम०
ष्टस्यममेदंकार्यमितिबोद्धृत्वं बोद्धृत्वंचबोधप्रयोज्यकत्वंतच्चकामनायाश्रा ५२

पि अन्यथातथाविशेषणत्वानुपपत्तेः विशेष्यान्वयिनान्वयिनएवविशेषणत्वा
त् उक्तविशेषणत्वसंभवेउपलक्षणत्वस्यान्याय्यत्वात् तथाचकामनायास्तादृशा
बोधप्रयोजकतानसाक्षात्किंतुस्वविषयसाधनताद्वारेति ततइष्टसाधनी
भूतंयागविषयकंकार्यंकृतिसाध्यमितिधीः नत्वपूर्वेकृतिसाध्यत्वंकयामद्वा
रीकृत्येतियागकृतिसाध्यताधीः नचापूर्वस्यमानांतरानुपस्थापकत्वात्
अनुपस्थितेकथंशक्तिधीरितिवाच्यं कार्येशक्तोविधिधिरितिकार्यत्वेनप्र
कारेणघटादिविशेष्यकशक्तिग्रहस्यैवसंभवात् समानप्रकारकत्वेनैवहि
शक्तिग्रहशाब्दबोधयोःकार्यकारणभावांगीकारात् नतुसमानविशेष्यक
त्वेनापि नचविधेःकार्यत्वेशक्तेःकमतयाधर्मिणिलक्षणैवास्तुकतंशक्तौ

तिवाच्यं तन्मतेनाक्षणिकस्याननुभावकत्वेनविधेरपूर्वांशेप्रामाण्यानुपपत्तेः तथा
चेष्टसाधनीभूतोयागःस्वर्गकामकृतिसाध्यत्वइतितन्मतेचरमोबोधः प्रवृत्तिज
नकश्चायमेवबोधइति नरसत् अन्वयप्रयोजकरूपवत्वंनयोग्यताकिंतुबाध
कप्रमाविरहोयोग्यताऽवच्छेदकत्वात् साचस्वरूपसतीहेतुः नचापूर्वस्यानुपस्थि
तौकथमिष्टसाधनत्वान्वयः बाधःसामान्यज्ञानस्यकिंचिद्विशेषज्ञाननियतत्वा
दितिवाच्यं सामान्यतस्साधनत्वत्वेनेष्टसाधनत्वस्यज्ञानात्तस्यचसाक्षादसंभवे
परंपरितस्यज्ञानं परंपरासाधनत्वत्वेनज्ञानेनतदघटकापूर्वोपस्थितेरावश्य
कत्वेनतुसामान्यरूपेणापिप्रतीतस्यानुपपत्त्यातत्कल्पनमितिसमासः महा राम० ५३
स्तु यत्रैकमेवप्रधानंपूर्वांगसहितात्तस्मादुत्पन्नपूर्वंतेनचसर्वांगोपेतेनपर

मापूर्वमितिद्व। पूर्वेदर्शपूर्णमासयोरुक्तपक्षद्वयवृत्तिभ्यांसमुदायाभ्यांयुगपत्क
लापूर्वारंभायोगादेकैकंप्रतिसमुदायापूर्वंकल्प्यतेतत्कथंभावापेक्षायामप्य
त्वाधानाद्यंगोपदेशः ततःपूर्ववदेवांगसहितेभ्यस्तदुत्पत्तिर्नसंभवतीतिप्रति
त्रिकंत्रीणित्रीण्युत्पत्त्यपूर्वाणि तस्मादेकमेवपरमापूर्वमितिनवापूर्वाणीतिवद
ति तन्मृग्यं प्रधानापूर्वद्वयेप्रमाणाभावात् षड्भिःकलिकापूर्वैरेवपरमापू
र्वजननसंभवात् नचपौर्णमास्यांपौर्णमास्यायजेतेत्यमावास्यायाममावा
स्यययायजेतेतिवाक्यद्वयेसमर्थःपदविधिरितिसत्त्वस्यपदत्वसंपादकोविधि
ःपदविधिः सामर्थ्यंचेतरनैरपेक्ष्यरूपमित्यर्थकत्वेनकर्तृकरणयोस्तृतीये
त्यस्यापिपदविधित्वेनतत्राप्येतस्योपस्थित्यातेननिरपेक्षसाधनतायामनु

न्निष्ठयात्तीयाप्युत्पात्रिकस्य त्रिकस्यान्यनिरपेक्षत्वावगमेन तस्य चान्योन्यसापे
क्षाग्नेयादियागषट्कसाध्यपरमापूर्वसाधनत्वासंभवात्तदावश्यकत्वमिति वा
च्यं समर्थः पदविधिरिति सूत्रस्य सुप्तिङंतपदविधिविषयत्वेनैतद्विषयत्वा
त् एकार्थीभावरूपस्य सामर्थ्यस्येह ग्रहणस्य महाभाष्यकाराद्यनभिप्रेतत्वाच्च पू
र्वोक्तार्थकत्वे दंडेन चक्रेण घटं करोतीत्यादिनामसाधनापत्तेः तथा निरपेक्ष
त्वसाधनाभावात् सजातीयेतरनिरपेक्षत्वमित्युक्तौ तु तंतुना पटं करोतीत्या
देरसाधुतापत्तेः कुंभकारः गार्ग्य इत्यादेः कृत्तद्धितविध्योः प्रकृतिप्रत्यययोः प
दत्वसंपादकत्वाभावेनैकार्थीभावानापत्तेश्च व्याकरणे विधिमात्रस्यैव पदत्व राम॰ ५४
संपादकत्वेन व्यावर्त्याभावाच्चेत्यलं समस्तासमस्तासमस्तभेदेन वाक्यं द्विविधं

समासः षड्विधः सुबंतस्य सुबंतेन तिङंतेन प्रातिपदिकेन धातुना च तथा तिङंत
स्य तिङंतेन सुबंतेन चेति क्रमेणोदाहरणानि भूतपूर्वः अनुव्यचलत् कुंभका
रः कटप्रूः पिबतखादत जहिजोडः तदुक्तं सुपां सुपा तिङा नाम्ना धातुनाथ ति
ङां तिङा सुबंतेनेति विज्ञेयः समासः षड्विधो बुधैरिति समासत्वं चैतदन्यतमत्वं॥
अव्ययीभावतत्पुरुषबहुव्रीहिद्वंद्वादिसंज्ञा अप्येतदवांतराः तत्रापि तत्पुरुष
विशेषः कर्मधारयः तत्पुरुषः समानाधिकरणः कर्मधारयः इत्युक्तेः कर्मधारयवि
शेषो द्विगुः संख्यापूर्वो द्विगुरित्यनुशासनात् तद्धितार्थविषये उत्तरपदे परत
ः समाहारे च वाच्ये यः संख्यापूर्वः स द्विगुरिति तदर्थः अव्ययीभाव इत्यधि
कारविहितत्वमव्ययीभावत्वं तत्पुरुषत्वं च तत्पुरुष इत्यधिकारविहितत्वं

कर्मधारयत्वंचतत्पुरुषत्वेसतिसमस्यमानपदार्थद्वयाभेदबोधकत्वं सत्यंतेन
बहुव्रीहिनिरासः तत्पुरुषत्वेसतिसंख्यावाचकपूर्वपदसमानाधिकरणनामस
मुदायत्वंद्विगुत्वं पूर्वसत्यंतेनत्रिकटुपंचकन्यमित्यादिकर्मधारयव्युदासः शे
षोबहुव्रीहिरित्यधिकारविहितत्वंबहुव्रीहित्वंबहुव्रीहित्वंपरस्परानन्वयार्थकाने
कपदघटितसमासत्वंद्वंद्वत्वंउपकुंभमित्याद्यव्ययीभावः कुंभपदलक्षणया
कुंभसमीपइत्यादिरन्वयबोधः राजपुरुषइत्यादीतत्पुरुषः राजपदेराज
संबंधिलक्षणयाराजसंबंध्यभिन्नःपुरुषइत्यन्वयबोधः राजसंबंधएवलक्ष
णेतितुमणिकृतः नीलोत्पलमित्यादिकर्मधारयः तत्रचनीलपदस्यगुणिपर रामः ५५
तयानीलगुणवदभिन्नमुत्पलमित्याद्यन्वयबोधः पंचकपालइत्यादिर्द्विगुः

कपालपदस्यपंचाभिन्नकपालसंस्कृतेलक्षणयापंचकपालसंस्कृतइत्याद्यन्व
यबोधः चित्रगुरित्यादिर्बहुव्रीहिः तत्रचगोपदस्यचित्रगोस्वामिलक्षकतयाचित्र
गोस्वामीत्यादिबोधः धवखदिरौपाणिपादमित्यादिर्द्वंद्वः अत्रचप्रकृत्यर्थमात्र
बोधः अधिकंमुक्तावलीप्रभायांविवेचयिष्यामः यत्तुविभक्त्यघटितपूर्वपदक
नामसमुदायत्वंसमासत्वमिति तन्नकंठेकालइत्याद्यलुक्समासाव्याप्त्यापत्ते
: विभक्त्यनुशासनिकलोपाभावविशिष्टत्वनिवेशेपिप्रतुव्यचलतपि
बतख्यादतलदिगोऽस्मीत्यादावव्याप्त्यापत्तेः नामसमुदायत्वाभावात्-इष्टा
पत्तौतुतत्रयुक्तस्वरादिकार्यानापत्तिः अतएवमयादसमहावाक्योत्तरत्वत
नादिस्वार्थस्ययावदर्थविछिन्नवियतानालिबोधेहेतुः तादृशांतवाक्यंतथावि

धार्येसमासइतिपरास्तं निधायेत्यादौ ब्रव्याप्यापत्तेश्च इष्टापत्तौतुल्यवादेर्गा
नापत्तेः यदपिनियमतः पूर्वपदार्थविशेष्यकबोधजनकसमासत्वमव्ययीभा
वत्वं तत्पुरुषेऽतिव्याप्तिवारणायनियमतइति अब्राह्मणोऽपिप्पलीत्यादौ ब्रा
ह्मणभिन्नः पिप्पल्यादिमितिपूर्वपदार्थविशेष्यकबोधजनकत्वात्इतित
दपितुच्छं द्विगार्ग्यंसप्तगंगंउन्मत्तगंगंइत्याद्यव्ययीभावेऽव्याप्तेः अत्रहिपूर्व
पदलक्षणयावंश्यौद्वौगार्ग्यौसमाहृताःसप्तगंगाःउन्मत्तगंगाधिकरणमित्यादि
बोधात् तत्रतदनावेतत्प्रयुक्तस्वराद्यनापत्तेः नचेष्टापत्तिनचात्रकर्मधार
यः स्वरभेदार्थमपिबहुव्रीहिस्वीकारादितिस्वग्रंथविरोधात् नचस्वरादिका रामं० ५६
र्यनाप्रयोजकमन्यदेवतदितिवाच्यं तदनिरुक्तेः सर्वसाधारणमदुरीत्यैवनि

र्वाहेत्वदुक्तरीतेरजागलस्तनायमानत्वात् लौकिकेप्रयोगेविभक्तित्वावच्छेदेनवै
रूप्याभाववतामेकशेषोविधीयते वैरूप्यंचशब्दतोऽर्थतोवाविभक्तिस्वसारूप्येउ
पलक्षणं तेनविभक्त्युपपत्तेःपूर्वमेवायं शब्दतंत्रेएकस्माच्छब्दात्क्रमेणार्थद्व
योपस्थितिः अर्थतंत्रेएकस्माच्छब्दात्युगपदर्थद्वयोपस्थितिः शब्दतोतुशब्द
भेदः एकशेषेतुएकोनसंहितोऽपरःश्रूयमाणःशब्दइतिभेदोवसेयः य
दुत्तरंयःप्रत्ययोनुशिष्टःसतद्घटकेतराविशेषणार्थगतस्वार्थबोधकस्त्य
त्रचप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वमितिव्युत्पत्तेस्तात्पर्यात् ध
वखदिरावित्यादौधवादेःप्रकृतित्वाभावेपिनक्षतिः इतराविशेषणेतिविशे
षणेतिविशेष्यणाच्चनराजपुरुषइत्यादौराज्ञिविभक्त्यर्थान्वयइतिसमासः

असमस्तं चैत्रः तंडुलं पचतीत्यादि तत्र हि तंडुलादिपाकक्रियाकारकं पाकक्रिया
कारकत्वंच पाकक्रियाकर्तृकर्मान्यतरत्वं एवमन्यत्रापि चैत्रपदोत्तरप्रथमाया
:संख्यामात्रमर्थः परिभाषाविशेषविषयत्वादिरूपैकवचनत्वादिनैकत्वादेरुक्ते
:इत्थंच सुप्तिङ्भ्यामेकमेवैकत्वं बोध्यते संभेदेन्यतरवैयर्थ्याभावादिति प्रथमा
याश्च पूज्यत्वार्थकत्वमपि तिरस्तिष्ठतीत्यादौ प्रथमासाधुत्वार्थं क्वचित्संबोध्यत्व
मपि च चैत्रोद्देश्यत्वरूपं तत्र च लक्षणयुगपद्वृत्तिद्वयविरोधे प्रमाणाभावेन
युगपदेकत्वसंबोध्यत्वाद्योर्भाने बाधकाभावः कर्तृत्वं चाख्यातार्थः सामान्यतः
कर्तृत्वं च कृतिरेव पाकविषयकपाकानुकूलकृतिमत्त्वं च पाककर्तृत्वं धा राम०
त्वर्थक्रियाया विषयत्वानुकूलत्वाभ्यां आख्यातार्थकृतावन्वयः तेन कूपकर्तुर्दु ५७

र्बलस्य च न गोवधगुरुनाशोत्पादकर्तृत्वं कूपखननानुकूलत्वेपि गोवधविषयत्व
विरहात् दुर्बलकृते नाशोत्पादनविषयकत्वेपि तदनुकूलत्वाभावात् वैयाकरणा
स्तु धात्वर्थव्यापाराश्रयत्वं कर्तृत्वमित्याहुः केचित्तु यद्धातूत्तराख्यातेन यगाद्य
समभिव्याहृतेन यद्धात्वर्थान्वितयद्धर्मवत्त्वं बोध्यते तद्धर्मवत्त्वमेव तत्क्रियाकर्तृ
त्वं पचतीत्यादौ पाकानुकूलव्यापारवत्त्वादि पाकादिक्रियाकर्तृत्वं पच्यते
तंडुल इत्यादौ तंडुलादेश्चारिण्ययगावसमभिव्याहृतेति वैयाकरणमतं
परिष्कुर्वंति तदसत् पच्यते ओदनः स्वयमेवेत्यादौ वैयाकरणमतसिद्धस्य
कर्तृत्वस्यानापत्तेः पच्यते तंडुलश्चैत्रेणेत्यत्र चैत्रस्य कर्तृत्वानापत्तेश्च
कर्मत्वं द्वितीयार्थः कर्मणि द्वितीयेत्यपि नाव प्रधानो निर्देशः तच्च परसमवे

तत्क्रियाजन्यफलशालित्वं तत्र क्रियाया धातुलभ्यत्वात् जन्यत्वशालित्वयोश्च सं
सर्गमर्यादया लाभात्फलमात्रं द्वितीयार्थः गमित्यजिप्रभृतीनामपि व्यापारमात्रम
र्थः फलविशेषान्वयबोधे धातुविशेषजन्यव्यापारोपस्थितेर्हेतुतया तद्धातू
पस्थाप्यव्यापारे तत्तत्फलविशेषजनकत्वमेव प्रतीयते नत्वन्यथा द्वितीया
दे गम्याद्युपस्थितव्यापार एव फलान्वयबोधकत्वाच्च न ग्रामं स्पन्दत इति प्रयो
गः घटं यतत इति वारणाय द्वितीयादेर्विषयत्वादिबोधे कृतादिसमभिव्या
हारस्येव फलविशेषबोधे गम्यादिसमभिव्याहारस्यैवाकांक्षत्वात् कर्मप्र
त्ययासमभिव्याहृतगमनादिपदस्य तत्तत्फलावच्छिन्नव्यापारे च नादितात्प रा०म० ५९
र्यकल्पनाच्चैकार्थतान्ययेन प्रामाणिकानां स्वारसिकोन त्यागगनादिपदप्र

योगः अनादितात्पर्यस्यैव स्वारसिकप्रयोगनियामकत्वात् ग्रामादेरिव स्वस्यापि
कर्मत्ववारणाय परसमवेतेति द्वितीयार्थफलेयत्व्यक्तेरन्वयः तद्व्यक्तित्वावच्छि
न्ननिष्ठवत्त्वमेव परत्वं वकृत्यर्थस्य ग्रामादेः प्रत्ययार्थफलवृत्तित्वसंसर्गेणा
न्वयः तथा च ग्रामभिन्नसमवेतग्रामवृत्तिसंयोगजनकव्यापारानुकूलक्रिया
मानित्यन्वयबोधः गां पयो दोग्धि मैत्र इत्यादौ गोवृत्तिविभागजनकपयोवृत्ति
क्षरणानुकूलव्यापारकर्तेति बोधः गवादेः साक्षात्क्रियाजन्यफलशालिता
भावेन गौणकर्मत्वं अकथितं चेति सूत्रस्य विषयः एवं घटं जानातीत्यादौ वि
षयत्वादिरूपं तदिति कर्तृकरणयोस्तृतीयेति अनुशासनात् कर्तृत्वकरणत्वे
तृतीयावाच्ये कर्तृत्वं पूर्वं निरुक्तं कर्तृत्वं पूर्वं निरुक्तं करणत्वं व्यापारवत्वे सति

असाधारणकारणत्वं छिदादिक्रियानिरूपितं परशुनिष्ठं जटाभिस्तापस इत्या
दौ विशेषणत्वं तृतीयार्थः तच्चाश्रयतारूपं क्वचिच्च कारणत्वमपि अन्नेन व
सतीत्यादौ अन्नहेतुकावसतिरित्यर्थः क्वचिदभेदोपि धान्येन धनवानित्या
दौ धान्याभिन्नधनवानिति तदर्थः क्वचिद्विकारोन्यूनाधिकरूपोपि तद
र्थः अक्ष्णा काणः मुखेन त्रिलोचन इत्यादौ तत्र काणत्वं चक्षुष्मद्गोलकद्व
यमध्यान्यत्वे सति चक्षुष्मत्वं तथा चाक्षिविकारवान् काण इति बोधः अक्षि
पदं गोलकपरं चतुर्थी संप्रदाने इत्यनुशासनात् संप्रदानत्वं तदर्थः तच्च राम॰
विजातीयक्रियाजन्यफलभागित्वेनोद्देश्यत्वं तथा च त्यागजन्यफलभागि ५९
त्वप्रकारकब्राह्मण इत्युद्देश्यताकगोविषयत्वं गानुकूलकृतिमानिति बो

धो ब्राह्मणाय गां ददातीत्यादौ निष्कृष्टः त्यागे वैजात्यनिवेशान्न रजके तु संप्रदान
त्वं वैजात्यं च प्रयोगगम्यं वृक्षायोदकमासिंचतीत्यत्र सेकजन्यपत्रपुष्पादि
फलभागित्वेनोद्देश्यत्वं वृक्षादेः तथा च वृक्षीयपत्राद्युद्देश्यकसेचनविषय
ककृतिमानिति बोधः नारदाय रोचते कलह इत्यादौ चतुर्थ्याः वृत्तित्वमर्थः
तेन नारदीयरुचिविषयः कलह इति बोधः कलह इति बोधति बोधः वैश्या
य शतं धारयतीत्यत्र पुनर्दानमंगीकृत्य ग्रहणं धारणं तेन वैश्याभिमतशतकर्म
कतादृशग्रहणाश्रय इति बोधः विष्णवे नम इत्यत्र स्वाधिकोत्कर्षवत्तया ज्ञा
पनं नमस्कारः ज्ञानान्वयिविषयित्वं चतुर्थ्यर्थः तथा च विष्णुविषयकं यत्स्वा
वधिकोत्कर्षवत्त्वज्ञानं तदनुकूलो मदीयो व्यापार इत्यन्वयबोधः अयं च

व्यापारो वृक्षनिष्ठः प्रतीयते नमस्करोतीत्यादौ तु कर्तृनिष्ठ इति विवेकः अग्नये
स्वाहा पितृभ्यः स्वधा इन्द्राय वषडित्यादौ उद्देश्यत्वं चतुर्थ्यर्थः स्वाहेत्यादीनां त्यागो
ऽर्थः तथा च वह्न्युद्देश्यकत्यागविषयः इदमिति बोधः अपादाने पंचमीत्यनुशा
सनात् अपादानत्वं पंचम्यर्थः तच्च नेदे विभागस्य वृत्तित्वं प्रतियोगितावच्छे
दकत्वं जनकस्यत्वं च संसर्गजन्यं तथा च वृक्षवृत्तिभेदप्रतियोगितावच्छेदक
वृक्षवृत्तिविभागजनकपतनाश्रयः पर्णमिति वृक्षात्पर्णं पततीत्यत्र बोधः॥
व्याघ्राद्बिभेति दंडहस्तः शत्रुतो वारयतीत्यादौ जन्यत्वं पंचम्यर्थः व्याघ्रजन्य
भयाश्रयः दंडजन्यो घटः शत्रुजन्यभयाभाववान् व्यापारवानिति बोधः कूपा रम० ६०
दंधं वारयतीत्यत्र पंचम्याः पतने द्वितीयायाश्च वृत्तित्वं धातोश्च प्रतिबंधानुकू

लो व्यापारः तथा चांधवृत्तिः कूपपतनप्रतिबंधस्तदनुकूलव्यापारवानिति बोधः य
त्तु यत्कूपे पतनमप्रसिद्धं तत्रान्वयासंभवादिति तन्न तादृशकूपस्यैवाप्रसिद्धेः
विषान्मित्रं वारयतीत्यत्र वृत्तित्वं पंचम्यर्थः द्वितीयाया अनुयोगित्वं अभावो
ऽनुकूलव्यापारश्च धात्वर्थः तथा च विषवृत्तिभोजनसंबंधावच्छिन्नप्रतियोगि
ताकमित्राभावानुकूलव्यापारविषयकवृत्तिमानिति बोधः विषवृत्तिमित्र
कर्तृकभोजनविषयत्वाभावानुकूलव्यापारानुकूलकृतिमानिति वा त्वन्व
यबोधः द्वितीयायाः कर्तृत्वं विषयत्वं धातोश्च भोजनस्याभावो व्यापारश्चार्थः
हिमवतो गंगा प्रभवतीत्यत्र पंचम्याः संयोगाव्यवहितोत्तरत्वं धातोश्चाद्यक्ष
णसंबंधः तथा हिमवत्संयोगाव्यवहितोत्तराद्यक्षणसंबंधाश्रयनावती

गगेत्यन्वयः सप्तम्याधेयत्वमर्थः नत्वधिकरणत्वं तथासतीभूतलेनघटइत्यादेरन
अर्थाभावान्वयबोधानापत्तेः निरूपितत्वादेर्वृत्तित्वनियामकसंबंधत्वाभावात् च
र्मणिद्वीपिनंहंतीत्यत्र निमित्तत्वमर्थः तच्चप्रयोज्यत्वसंबंधेनेछेचचर्मणःसिद्धत्वे
पियथेष्टविनियोगवत्वेनेछायाःसंभवात् तथाचचर्मेछाप्रयोज्यहननानुकूलकृ
तितिबोधः क्वचिच्चजन्यत्वमपिद्वारदादिपदसमभिव्याहारात्द्वारत्वावछिन्नजन्य
त्वलभ्यते तथाचद्वारदिपुष्यतिसप्तच्छदइत्यादौद्वारजन्यपुष्पाश्रयःसप्तच्छद
इतिबोधः द्वारदिपुष्यंतिरंभाकुसुमाइतितुन तत्पुष्पेपुद्वारत्वावछिन्नजन्यत्वाभा राम० ६१
वात् क्वचित्सामानाधिकरण्यमपितदपिकालिकंदैशिकंचतत्राद्यंगोषुदुह्यमा
नासुगतइत्यादौतथाचदोहनविशिष्टगोसमानकालीनगमनकर्त्तेतिबोधः॥

गमनेदोहनसमानकालीनत्वबोधस्त्वेतत्रकालिकः अपरंचगुणकर्मान्यत्वेसे
तिसत्वादित्यादौ।क्वचित्तादात्म्यमपि यथाशनेकवर्णसमइत्यादौतस्यसमवदर्थै
कदेशसाम्येन्वयः तथाचशनाभिन्नकर्णसाम्याश्रयइतिबोधः यथावागोषुकृष्णासं
पन्नक्षीरेत्यादौ अत्रचकृष्णापदसंपन्नक्षीरापदयोस्तदन्याप्यर्थः युगपद्वृत्ति
द्वयविरोधानंगीकाराच्च युगपछक्यलक्ष्योभयबोधः गवाभिन्नकृष्णाभिन्न
त्वावछेदेनसंपन्नक्षीराभिन्नान्वयः गवाभिन्नकृष्णतादात्म्यावछेदेनचसंप
न्नक्षीरान्वयः तेनगोतादात्म्यवतीकृष्णासंपन्नक्षीरागोतादात्म्यवतीकृष्णा
न्यासंपन्नक्षीरान्येतिबोधः वारणंचगोषुगोःसंपन्नक्षीरेत्यस्यगोविधेयसंपन्न
क्षीरेत्यस्यचगोतादात्म्यवृत्त्यात्वावछेदेनसंपन्नक्षीरत्वाभावात् गोतादात्म्य

वंदेतद्भिन्नत्वावच्छेदेनसंपन्नक्षीरान्यत्वाभावात् एवंनिर्द्धारणषष्ठ्या अपि शेष
ऽषष्ठ्यास्तुस्वस्वामिभावादिरनेकविधःसंबंधोर्थः आख्यातत्वंसंकेतविशेष
संबंधेनआख्यातपदवत्वरूपं दशानांलकारसाधारणंनेचलडादयःस्तत्रचल
ड्वादिनावर्त्तमानत्वादेःशक्तिः वर्त्तमानेलडित्यनुशासनात्तनावप्रधानोति
देनुः आख्यातत्वेनकृतोलाघवान्यत्रचकृतौबाधोरथोगच्छतीत्यादेत
त्राश्रयत्वादेर्लक्षणा वर्त्तमानत्वंचप्रयोगज्ञानाधीनशाब्दबोधाधिकर
णतत्तत्कालएवतद्वृत्तित्वान्नपाकादेनव्यवहारः मौनिस्नानकादेश्चजिष्या
दिजन्यप्रयोगज्ञानसत्वमक्षतमेव प्रयोगाधिकरणत्वंचबुद्धिस्थत्वादिव राम०
तस्वरूपसदेवानुगमकं प्रयोगाधिकरणकालेशक्तिग्रहादेवतदादेरिववि ६२

शेषरूपेणबोधः प्रयोगोपिप्राथमिकोग्राह्यः तेनेदानीतनप्रयोगाधिकरणका
लवृत्तित्वाभावेपिमथुरांयान्निमाधवइत्यादौनानुपपत्तिः चैत्रःपचतीत्यादौसु
प्तिङ्भ्यामेकमेकत्वमिवसंप्रतिपद्यतीत्यादौनिपाताख्याताभ्यामेकमेववर्त्तमा
नत्वंबोध्यते एवमेवचहरत्यघंसंप्रतीत्यादौउपपत्तिः लोऽर्थः क्वचिद्वर्त्तमानसा
मीप्यमपि वर्त्तमानसामीप्येवर्त्तमानवद्वेतिपाणिनिस्मरणात् वर्त्तमानसा
मीप्यंचातीनागतसाधारणंतच्चनविष्यद्वृत्तिवर्त्तमानध्वंसोत्पत्तिक्षणोत्पत्ति
कक्रियावृत्तित्वरूपं अतीतवृत्तिवर्त्तमानक्षणोत्पत्तिकध्वंसप्रतियोगिक्रियावृ
त्तित्वरूपंकदायास्यसीत्युक्तेएषगच्छामीत्यादावाधकदागतोसीतिपृष्टेएष
गच्छामीत्यादावंत्यंप्रतीयतेतदपिधात्वर्थान्विति क्वचिदुत्पत्तिरपितदर्थः यथा

नश्यतीत्यादौ अन्यथानाशस्येदानीमपिसत्वेनचिरनष्टेपिघटेनश्यतीतिप्रयोगा
पत्तेः वर्त्तमानत्वंचधात्वर्थन्वेति अतएववर्त्तमानक्रियावृत्तेर्धातोरितिसाधु
संगच्छते आख्यातार्थकृतौनतदन्वयेपाककालेपचतीतिनस्यात् चेष्टायाःकृतेसु
दूरपराहतत्वात्तस्याश्चपाकपूर्वमिति भूतत्वमनद्यतनत्वंपरोक्षत्वंचलि
टोर्थः प्रयोगज्ञानाधीनज्ञानाद्यधिकरणकालवृत्तिध्वंसप्रतियोगित्वंभूतत्वं पू
र्वरात्र्युत्तरार्द्धविशिष्टोत्तररात्रिपूर्वार्द्धविशिष्टदिनत्वंअद्यतनत्वं तद्भिन्नत्वम
नद्यतनत्वं परोक्षत्वंचप्रयोगज्ञानाधीनज्ञानाद्यधिकरणकालिकप्रयोगानुसंधा
ननिष्ठसाक्षात्करोमीत्याकारकज्ञानाविषयत्वंत्रितयंधात्वर्थन्वेति एतद राम० ६३
भिप्रेत्यैवभूतानद्यतनपरोक्षार्थवृत्तेर्धातोरित्युक्तंप्राह्निकैः एवमुत्तरत्र

भविष्यत्वमनद्यतनत्वंचलुटोर्थः भविष्यत्वंचवर्त्तमानप्रागभावप्रतियो
गित्वं भविष्यत्वमात्रंलृटोर्थः लोटोलिङश्चार्थश्चविधिराशीश्चविधिर्निमंत्रणाधीष्ट
संप्रश्नप्रार्थनेषुलिङ् लोट् आशिषिलिङ्लोटौ इत्यनुशासनात् विधिःप्रवर्त्तनंप्र
वर्त्तिरुक्तं आशीश्चवक्त्रिच्छाविषयत्वं तेनभवतुतेपुत्रइत्यादौवक्त्रिच्छाविषयोत्पत्ति
मानत्वत्संबंधिपुत्रइतिबोधः एवंभूयादित्यादावपिहेतुहेतुमद्भावोपितदर्थः
यथायोब्राह्मणायावगुरेतंशतेनयातयादित्यादौ तत्रब्राह्मणावगोरणस्यशा
तयातनहेतुत्वबोधात् लङश्चानद्यतनत्वमतीतत्वं लुङोभूतत्वमुत्पत्तिश्च॥
व्याप्यक्रिययाव्यापकक्रियायाःपादनंलृङोर्थः यथासुवृष्टिश्चेद्भविष्यत्तदासुभि
क्षमभविष्यदित्यादौअत्रसुवृष्टिभवनरूपक्रियाव्याप्यक्रिययासुभिक्षभव

नरूपव्याप्यपकक्रियायाश्चापादनात् अधिकंस्वयमूहनीयं शक्तंपदमिति स्वनि
रूपकविशेष्यतानिरूपितप्रकारतावच्छेदकघटकजन्यत्वनिरूपकत्वरूपपरंसं
बंधेननिरूपकत्वसंबंधेनवाशक्तिमदित्यर्थः अस्मादिति तत्पदजन्यबोधविष
यतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबंधेनेश्वरेच्छावत्त्वंशक्यत्वमित्यर्थ
ः एतनेश्वरेच्छायाःसन्मात्रविषयत्वात्गंगादिपदशक्यत्वंतीरेपिस्यादितिदूषणंनि
रस्तं तीरादेर्गंगादिपदजन्यबोधविषयतासत्वेपितदंशेमुद्दविषयत्वत्वादिनै
वतादृशविषयत्वादिप्रकारकत्वस्येश्वरेच्छायाउपपद्यते गम्यते नतुविशिष्टविष
यत्वत्वादिनाइत्यनभ्युपगमात् नचज्ञानकृतिभ्यांविनिगमनाविरहः अर्थतात्पर्य राम० ६४
ज्ञानासमनुरोधेनेदृशाकारत्वस्येच्छायांक्लृप्तत्वेनतादृशेच्छायाज्ञानहेतुत्वस्यक्लृप्तत्वात्

॥आधुनिकसंकेतज्ञानसाधारणकार्यकारणभावलाघवानुरोधेनेच्छायाएवशक्ति
त्वोपगमस्ययुक्तत्वाच्च एवंचजातिविशिष्टव्यक्तौकेवलव्यक्तौवाशक्तिः सतथाचसम
वायसंबंधेनकगोत्वप्रकारकोपस्थितौशाब्दबोधेचगोपदंशक्तिसंबंधेनगोत्ववि
शिष्टवत्गोत्वविशिष्टशक्तिमदित्याकारकनिर्णयत्वेनकारणता शक्तिमूलत्वेनसं
दिग्धावत्घटादिपदादुपस्थितेःशाब्दबोधस्यचानुदयात्निर्णयत्वनिवेशः॥
इदंशापदज्ञानस्यचसंबंधिज्ञानविधयार्थोपस्थापकत्वंहस्तिसंबंधित्वेनज्ञाते
हस्तिस्मरणस्यानुभवसिद्धत्वादेकसंबंधिज्ञानस्यापरसंबंधिस्मरणेउद्बोधक
विधयाहेतुत्वात् केवलजातावेवशक्तिः गोपदंशक्तिसंबंधेनगोत्ववत्गोत्व
वत्गोत्वशक्तंवेत्याकारकज्ञानस्यैवगोत्वविशिष्टशाब्दत्वस्यकार्यतावच्छेद

कत्वकल्पनयैवबोधेव्यक्तिविषयकोपपत्तिरित्याहुः तन्नकालेगौःपदंगौरित्य
प्रत्ययेनजातेःसमवायातिरिक्तसंबंधेनप्रकारतयाभानासंभवेनगवेतरास
मवेतत्वेसतिसकलगोसमवेतत्वेनतस्यप्रकारत्वेगौरवात् यत्तुजातिविशि
ष्टव्यक्तौशक्तिकल्पनेपिविनिगमनाविरहेणार्थविशेष्यकपदविशेष्यक
शक्तिज्ञानयोःकारणत्वकल्पने गौरवात् जातिशक्तिवादेतुपदविशेष्यक
जातिप्रकारज्ञानत्वेनैवहेतुत्वंनतुजातिविशेष्यकज्ञानत्वेनतथासतिध
र्मितावच्छेदकविधयागोत्वत्वानिवेशेगौरवात् जातेःसमवायेनैवस्वरूप
तोभानमितिनियमेनाभावादिति तच्चिंत्यं अस्मन्मतेपदविशेष्यकार्थप्रका
रकज्ञानस्यैवहेतुत्वं नत्वर्थविशेष्यकपदप्रकारकस्यनिर्णयत्वस्यावश्यंनिवेश्या

नीयतयार्थनिर्णयत्वापेक्षयापदनिर्णयत्वस्यगुरुशरीरत्वात् पूर्वोक्तयुक्त्याजाते
:समवायेनैवस्वरूपसतोभानमितिनियमस्यावश्यकत्वाच्च तदुक्तंच प्रथमतो
वृद्धव्यवहारात्एतदुत्तरंचव्याकरणादितइति सुष्ठमन्यत्र लक्षणापिवृत्त्यंत
रंसाचशक्यसंबंधरूपा शुद्धागौणीभेदेनचसाद्वेधा सादृश्यातिरिक्तसंबंधेनाद्या
जहत्स्वार्थाचाजहत्स्वार्थाचसा जहतिस्वानिपदान्यर्थंशक्यार्थंयस्यांसाजह
त्स्वार्था तद्भिन्नाजहत्स्वार्था वह्निपरेधूमोस्तीत्यादावाद्या छत्रिणोयांतीत्या
दौपराछत्रिणोपिगमनान्वयात् पदंचतुर्विधं यौगिकंरूढंयोगरूढंयौगि
करूढंचेति आद्यंपाचकादिपदंयोगेनपाककर्तृबोधकं द्वितीयंघटादि
पदंरूढ्याघटादिवाचकं तृतीयंपंकजादिपदंयोगरूढ्यापंकजनिकर्तृत्वेन

न्वयबोधकं चतुर्थपूर्वमपदंयोगेनमंडपानकर्त्तुरुद्याविनातस्यबोधकं
केचिदिदंनाधिकमन्यंतेयौगिकादावेवांतर्भावात्आकांक्षेति तज्ज्ञानमित्यर्थ
: पदस्येति यादृशसंबंधेनयत्पदनिष्ठयत्पदस्यव्यतिरेकप्रयुक्तोयादृशा
न्वयबुध्यभावस्तत्पदस्यतादृशमभिव्याहारसंबंधेनतत्पदवत्वंतादृशा
न्वयबोधेआकांक्षेत्यर्थः प्रकृतान्वयबोधसमानाकारान्वयबोधाभावस्यस्वरू
पसती प्रयुक्तत्वंचकारणाभावात्कार्याभावइत्यादिप्रतीतिसाक्षिकस्वरूपसं
बंधविशेषः नवतिचाव्यवहितपूर्वत्वसंबंधेनघटपदनिष्ठामपदस्यव्यति
रेकप्रयुक्तोघटीयाकर्मतेत्यन्वयबोधाभावइति घटपदस्याम्पदत्वंतादृशा राम० ६६
न्वयबोधेआकांक्षेतिलक्षणसमन्वयः अत्रचान्वयबुध्यभावांतेपरिचायकं॥

ततत्संबंधेननतत्पदत्वविशिष्टेनतत्पदत्वविशिष्टेनतत्पदत्वविशिष्टत्वमेवग्रा
ह्या आकांक्षातन्निर्णयएवशाब्दबुद्धौहेतुः इदंचज्ञायमानशब्दस्यकरणता
क्षमवलंब्याभिहितं अतएवानुपदंवक्ष्यति वाक्यार्थज्ञानेशाब्दज्ञानंतत्करणं
शब्दइति ज्ञानकरणतापक्षेतुयादृशसंबंधेनयत्पदत्वावच्छिन्नव्यतिरेकेति
वाच्यं ज्ञानकारणतापक्षेपदव्यतिरेकस्याप्रयोजकत्वात् कारणाभावस्यैव
कार्याभावप्रयोजकत्वात् उक्तदिशैवसर्वत्रैवोह्यं अर्थाबाधइति तद्व्यक्तित्व
तद्व्यक्तिनिष्ठव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वमन्यत्वंतद्व्यक्तेर्योग्य
तेत्यर्थस्तेनप्रमेयमभिधेयमित्यादौअभिधेयत्वादेर्बाधस्याप्रसिद्धत्वेपिनक्ष
तिनवावृक्षःसंयोगीत्यादौअयोग्यत्वं अर्पतद्व्यक्तित्वादेर्बाधकास्यबाध

प्रतियोगितावच्छेदकत्वस्याभावइत्यर्थः पयसासिंचतीत्यादौकरणत्वनिष्ट
तत्तद्यक्तित्वेपयोनिष्ठाभावप्रतियोगितावच्छेदकत्वमन्यत्वमितिलक्षणसं
गतिः संशयनिश्चयसाधारणेतज्ज्ञानहेतुः तद्धर्मावच्छिन्नविशेष्यकत्वतद्ध
र्मावच्छिन्नाभावनिर्णयाभावोवास्वरूपसतीहेतुः पदानामिति प्रकृतान्व
यबोधाननुगुणेनत्यदर्धंसाधिकरणक्षणनिन्नत्वेसतियःस्तत्पदप्रागभा
वाधिकरणसमयप्रागभावानधिकरणक्षणस्तदुत्पत्तिकृतत्पदत्वेताह
शान्वयबोधोपयिकाः सन्निःतज्ज्ञानंचशाब्दबोधहेतुः तेनस्यात्पामोद राम०
नेपचतीत्यस्यनानामन्नत्वं तात्पर्यज्ञानंचनशाब्दधीकारणं किंतुतन्नतत्प्र ६७
करणादिज्ञानंतद्ग्राहकत्वेनावश्यकत्वादितिमन्तानिमानः आकांक्षादीति

नप्रमितिजनकं गौरश्वइति गवाश्वयोराधाराधेयभावेनान्वयेनिराकांक्षं
तादृशान्वयबोधाभावस्यप्रथमांततत्पदव्यतिरेकाप्रयुक्तत्वात् एवंघट
ःकर्मत्वमित्यादावपिबोध्यं ईश्वरेतीति भ्रमादिदोषरहितत्वेनतदुक्तस्यप्र
मितिकरणत्वादितिभावः आप्तेति भ्रमप्रमादिदोषशून्यआप्तः संशये
त्यादिकृदोयदिनिर्वह्निःस्यात्तदानिर्धूमःस्यादित्यादितर्कस्यविपर्ययत्वाभावा
दत्रनोपन्यासः एकस्मिन्धर्मिणीति एकधर्मावच्छिन्नविशेष्यतानिरूपितवि
रोधसंसर्गावच्छिन्नानयप्रकारताशालिज्ञानत्वंसंशयत्वं समुच्चयेविरोधभा
नानंगीकारान्नदोषः विरोधविषयतायांचसंशयजनकीभूतदोषविशेषस्य
नियामकत्वं अतएवतद्बाधकवाक्याद्देनोच्छेरवःसंशयस्य मिथ्येति तदभा

वंवद्विशेष्यतानिरूपिततत्प्रकारताशालित्वंविपर्ययत्वं नचतत्रग्रहणस्मरणा
त्मकंज्ञानंद्वयमेवास्तुपेयप्रवृत्तिंरुक्षांचप्रत्यपिशुक्तिविशेष्यकरजतनेदंप्र
कारकज्ञानाभावत्वेनहेतुत्वंस्वीकरणीयमिति नतत्सिद्धिरितिवाच्यं शुक्ति
विशेष्यकरजतनेदंप्रकारकज्ञानाभावत्वशुक्तिविशेष्यरजतनेदंव्याप्यादिप्रका
रकज्ञानाभावत्वादिनाऽनंतहेतुताकल्पनापेक्षयालाघवात्शुक्तिविशेष्यरज
तत्वप्रकारकज्ञानत्वेनहेतुत्वकल्पनस्यौचित्येनतत्सिद्धेः व्याप्यारोपेणेति प
क्षधर्मतांशेऽआहार्यतद्व्याप्यवत्ताज्ञानजन्याहार्यमानसतद्वत्ताज्ञानमित्य
र्थः अत्रचापाद्यव्यतिरेकनिर्णयःकारणं आपादकांशेपक्षेबाधधीश्चआ तामं ६९
पाद्यव्याप्यापादकवत्वज्ञानं तत्रचप्रमात्वज्ञानाभावोपिआपादकवत्तांशे

।।व्याप्त्यंशेत्वप्रामाण्यज्ञानाभावोपेक्षितएव इष्टापत्तिर्मूलशैथिल्यंविपर्ययपर्या
यवसानंचेतित्रयोदोषाः इष्टापत्तिः पक्षेआपाद्यनिर्णयः सचतर्ककारणीभू
तापाद्यव्यतिरेकनिर्णयविघटकतयादोषः मूलशैथिल्यंआपाद्यापादकयोर्व्या
प्यज्ञानं तस्यचापाद्यव्याप्यापादकवत्वविघटकत्वेनदूषकत्वं तत्कोटितावच्छेदका
वच्छिन्नसाधकविपर्ययप्रतियोगितावच्छेदकावच्छिन्नापाद्यकतर्कस्यैवतदव
च्छिन्नाभावच्छिन्नाभावशंकानिवर्तकत्वंनतुकेवलंतद्विशिष्टबुद्धित्वावच्छिन्नंप्रति
तदापादकतर्कत्वेनप्रतिबंधकत्वं अन्यथावन्हिघटान्यतराभाववान्स्यात्।।
निर्धूमस्यादित्यादितर्कस्यापिवन्ह्यभावशंकानिवर्तकत्वापत्तेः तथाचापा
द्याभावेनापादकाभावसाधनेतत्कोटितावच्छेदकावच्छिन्नापर्यवसानेनतर्कस्या

प्रतिबंधकत्वात्तस्य दूषकत्वं नचतर्कसाधारणीभूतापादकाभावव्याप्यापाद्याभा
वनिश्चये एवविशेषदर्शनविधयाऽपादकाभावज्ञानंविरुध्यादिति किंतर्केणेति
वाच्यं तन्नारोपितकसत्वेशंकाप्रतिबंधाय तदावश्यकत्वात् तन्मूलकमान
सतादृशविशेषदर्शनस्यकुतश्चित्प्रतिबंधकादनुत्पादेनानियतत्वादित्यलंपल्ल
वेन सचतर्कोद्विविधः विषयपरिशोधकोव्याप्तिग्राहकश्चेति तत्राद्यमाह य
थेति द्वितीयस्तुवह्निव्यभिचारीस्यात्तर्हिवह्निजन्योनस्यादित्यादिः वस्तुतस्सर्वस्या
पियत्किंचिद्विषयपरिशोधकत्वादेकविधएवतर्कइतिमूलकृतोनिगर्वः स
र्वेषामिति अनुकूलचतद्वेदनीयंचेत्यर्थः अनुकूलंदुःखेतरवेदनीयंसाक्षा राम०
त्कारविषयं तथाचस्वाश्रयसमानाधिकरणसमानकालीनसाक्षात्कारविष ६९

यताव्याप्यदुःखेतरजातिमत्सुखमितिपर्यवसितं यद्वा अनुकूलमितिवेदनक्रिया
विशेषणं तथाचेष्टप्रकारकप्रमाविषयत्वंपर्यवसितं कस्यचित्सुखातिरिक्तेपि
इष्टत्वप्रकारकप्रमाविषयत्वात् सर्वेषामिति एवंदुःखलक्षणेपि तत्रप्रचेति
कूलत्वंद्वेषत्वमितिविशेषः तद्द्विविधं वैषयिकंमानोरथिकंच तत्राद्यंस्रक्चं
दनवनितादिस्वयोगोनिमित्तं धर्मस्तुतत्संपादनद्वारोपयुक्तः मानोरथिके
चज्ञानंनिमित्तं उभयत्रात्ममनःसंनिकर्षोऽसमवायी समवायीचात्मेति न
त्सर्वमनित्यंद्विक्षणस्थायिचनित्यसुखानंगीकारात् ईश्वरस्यकर्तृत्वग्राहक
मानेनैवनित्यज्ञानादिमत्वसिद्धेः सर्वेषांप्रतिकूलेति सुखलक्षणमेवदु राम०
खत्वेतरपदस्थानेसुखत्वेतरपदंप्रक्षिप्यतेयं अत्रचवैषयिकेकंटकादि ७

संयोगानिमित्तमानोरथिकेचव्याघ्रादिरोहनं अधर्मोपिपूर्ववद्देवसंयोगादिसंपादकः शे
षंपूर्ववत् सुखदुःखादिप्रयोजकादृष्टस्य भोगएवमुख्यंप्रयोजनं नतुभुज्यमानसुख
दुःखेअन्यथाभोगोनस्यात् भुज्यमानेजनयित्वैवतन्नाशात् तस्याश्चभोगस्यावश्य
कत्वं अतएवचन्यायवार्त्तिकटीकायांवाचस्पतिमिश्राःसुखदुःखभुक्त्यादेरेवचध
र्माधर्मयोरुपयोगोनतुसुखदुःखोत्पादेइति इच्छामितिकामपदवाच्येत्यर्थः य
द्यपिभाष्यादौकामस्येच्छाप्रभेदत्वमुक्तं तथापिस्वर्गकामइत्यादाविच्छामात्रवाच
कत्वावगमादित्यभिधानं यद्वा कामइतिगुणत्वव्याप्याजातिमत्त्वस्यवारणा राम० ७०
यकामइत्युक्तिः लाघवेनतादृशजातिमत्त्वस्यैवलक्षणत्वात् एवमुत्तरत्रापि
साचेच्छामीत्यनुव्यवसायसिद्धा इयंचोपायविषयिणीसमानधर्मितावच्छे

दककेष्टसाधनताज्ञानसाध्या फलविषयिणीचफलज्ञानसाध्या अत्रचभाष्यं
कामोभिलाषोरागः संकल्पःकारुण्यं वैराग्यमुपधाभावइत्येवमादयइच्छाभेदाः
मैथुनेच्छाकामः अभ्यवहरणेच्छाभिलाषः पुनःपुनर्विषयानुरंजनेच्छारागः अ
नासन्नक्रियेच्छासंकल्पः स्वार्थमनपेक्ष्यपरदुःखप्रहरणेच्छाकारुण्यं दोषदर्श
नाद्विषयपरित्यागेच्छावैराग्यं परवंचनेच्छाउपधा कपटपरपर्याया अंतर्नि
गूढेच्छाभावः चिकीर्षाजिहीर्षादिक्रियाभेदादिच्छाभवंति चिकीर्षाकर्तुमिच्छा
जिहीर्षासंहारेच्छा आदिनापरद्रव्यादानेच्छास्पृहा अवश्यकर्त्तव्येपिस्वद्रव्यप
रित्यागेच्छाकार्पण्यं अन्यायेनपरद्रव्यादानेच्छालोभइत्यादेःपरिग्रहः अत्रच
ज्ञानंनिमित्तकारणं आत्ममनःसंयोगोसमवायी समवायीचात्मेतिबोध्यं॥के

धो द्वेष इति क्रोधभेदक इत्यर्थः द्वेषत्वजातिमत्त्वं लक्षणं क्रोध इत्युक्तिस्तु पूर्ववत्
यदाह भाष्यकारः द्रोहक्रोधो मन्युरक्षमामर्ष इति द्वेषभेदाः तत्राशुतरविनाशी
क्रोधः चिरानुबन्धी अपकारपर्यवसायी द्रोहः निगूढापकारासमर्थस्यापका
रिणि द्वेषो मन्युः परोपकारासहनमक्षमा स्वगुणपरिभवापकारासमर्थो द्वेषो
ऽमर्ष इत्याद्यस्य आदिनेर्ष्यासूयादयो ग्राह्याः अत्र च दुःखवत्समवायिवाऽसमवायिकारणं
शेषं पूर्ववत् कृतिः प्रयत्न इति कृतिपदवाच्यत्वमित्यर्थः प्रयत्नत्वजातिमत्त्वं
लक्षणं यदाह भाष्यकारः प्रयत्नः संरंभः उत्साहः कृतिरिति पर्याया इत्येति प्रवृ
त्याजीवस्येति जीवापोयत्नो द्विविधः यदाह भाष्यकारः सर्वोऽपि द्विविधो जीवनपूर्व रामु० ७१
कः इच्छाद्वेषपूर्वकश्च सुप्तस्य प्राणापानादिसंतानप्रेरकः योवाप्रबोधकाले म

नस इंद्रियांतरप्राप्तिहेतुः सचाद्यः प्राणक्रियासाधारणनिमित्तजन्याक्रियात्वा
दित्यनुमानमेव तत्र मानं द्वितीयस्तु इच्छापूर्वको यः पटाद्युपादाने तंत्वाद्यौ कुविंदा
देः करादिव्यापारहेतुः द्वेषपूर्वकस्तु शत्रुवधादौ प्रवृत्त्यनाद्य एव निवृत्तिः
नच वैपरीत्यं सुषुप्तौ तत्कार्यापत्तेः अत्र च इच्छानिमित्तं प्रयत्नवदात्मसंयो
गासमवायिकारणकं क्रियारूपचेष्टाहेतुश्च विहितोत्यादि विहितनिषिद्धक्रि
याजन्यतावच्छेदकसुखदुःखासाधारणकारणतावच्छेदकजातिमंतौ धर्माधर्मौ
मिथ्याज्ञानजन्यवासनाजन्यत्वावच्छेदकजातिश्चानयसाधारणी अदृष्टत्वरूपा
एतद्द्वयमप्यतींद्रियं नचात्र मानाभावः आशुविनाशियागनिष्ठवेदबोधि
नाकालांतरभाविस्वर्गसाधनता सद्वारसाक्षादसाधनत्वेन सति साधनता

त्वात् इत्यनुमानस्यैवमानत्वात् नच यागध्वंस एव तद्व्यापारोऽस्तु घटादिनाशकार
णनाशप्रतियोगिनः कपालादेर्घटादिनाशं प्रतिबंधकत्वापत्त्या प्रतिबंधककु
क्षौ संसर्गाभावत्वेन यावदभावस्य कारणतात्स्या एव निवेशेन यागादौ प्रतिबं
धकत्वस्यापादयितुमशक्यत्वात् इति वाच्यं तस्य कीर्त्तनादिनाश्यत्वानुपपत्ते
र्ध्वंसस्य ध्वंसासंभवात् नच धर्मो विहितक्रियाक्षरति स्वकार्यजननाच्च भवति फ
लं नोत्पादयतीति तदर्थान्निदेष इति वाच्यं चिरातीतेन कर्त्तनादिना कालांत
रभाविस्वर्गफलप्रतिबंधायोगात् नच कीर्त्तनध्वंस एव विरोधीति वाच्यं स्व
कीर्तितकर्मस्थलीयसामग्रीबलेन कीर्त्तितस्य फलजनकतनकतया दुर्वारत्वा
त् एवं प्रायश्चित्तादिनाश्यत्वेन दुरितापसिद्धिः ध्वंसस्य निषिद्धक्रियाव्यापार

राम०
७२

त्वे कृतप्रायश्चित्तस्यापि नरकोत्पादप्रसंगात् एवं तत्त्वज्ञाननाश्यतयाप्यदृष्टसि
द्धिरित्यादि विस्तरमूह्यं गंगास्नानादौ देवताप्रीतेरभावेनेश्वरेस्वमते प्रीतेरभावे
नेश्वरेस्वमते प्रीतेरभावेन च देवदत्तप्रीतेर्दुरितत्वस्यात्यंतमसंभावितत्वमिति
दिक् संस्कार इति संस्कारत्वजातिमत्त्वं लक्षणं वेग इत्यादि वेगश्च कारणगु
णाद्युत्पद्यते क्वचित्कर्मणोपि कर्मजनकश्च नश्यति च विलक्षणसंयोगात् क्वचि
दाश्रयनाशात् विलक्षणकर्मणा कर्मणश्च नच क्रियातिरिक्ते वेगमानाभावः
॥ वेगेन चलतीत्यध्यक्षस्यैव मानत्वात् पृथिव्यादीति मूर्त्तवृत्तिरित्यर्थः दृष्ट
न्तानुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुरिति भाष्यदर्शनादनुभवएव भावना
हेतुरिति कणादमताभिप्रायेणाह अनुभवजन्येति वस्तुतस्त्वनुभवपरं ज्ञा

नसामान्यपरं स्मृतिहेतुरिति समवायघटितसामानाधिकरण्यसंबंधावच्छिन्नस्मृ
तित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकजातिमत्त्वं तल्लक्षणं अतींद्रिय
श्चायं नचात्रमानाभावः ज्ञानेनकालांतरनाविस्मृतिजननेद्वारत्वेनैवतत्सिद्धे
नचज्ञानध्वंसस्यैवद्वारत्वं तथासतिउपेक्षज्ञानानंतरंअनुगतोद्बोधककालेस्मृ
त्यापत्तेर्मन्मतेसंस्काराभावादेवनापत्तिः तत्रोपेक्षान्यज्ञानत्वेनहेतुत्वात्
ज्ञानस्मरणसंस्काराणांचसमानविशेष्यकत्वेनैवकार्यकारणभावः नाश
कंचास्यसमानप्रकारकस्मृतिः विरोधिज्ञानादिचाननुगतमेवसचाभ्यासा
दिनादृढतरउत्पद्यते तेनस्मृतिजननेउद्बोधकंसहकारीतच्चसादृश्यद स्मृ० ७३
र्शनाद्यनेकविधं अन्यथेति लक्षणंतुसंस्कारत्वव्याप्यजातिविशेषवत्त्वं॥

अतींद्रियोनित्यगतोनित्योः नित्यकारणगुणजन्यः क्रियाविशेषहेतुः अबलाद्युन्न
मितधनुःशारवादिक्रियास्वाश्रयस्ययथापूर्वसंयोगजनिकाविलक्षणाविलक्षणां
कारणंकल्पयतीतितत्सिद्धिः वेगस्तुस्वदेशांतरदेशसंयोगजननक्रियामात्रज
नकः सचसिध्यन्पृथिव्यामेवसिध्यति तथैवतत्कार्येपिलघ्वोवक्रिपक्षक
त्वकअनुमानग्रंथेऽनुकूलत्वंनस्थितिस्थापकेनापांतिरवारणायतत्रतदभावादि
तिकुसुमांजल्युपायेस्वरसात्ग्राहकटादिष्वपि वीहत्त्रिरिति स्पर्शवद्वृत्तिरिति
ग्रंथस्तुस्थितिस्थापकश्चतुर्ष्ट्टितिगुणनाभ्यानुसारेण अरुचिरिच्छाभावः आल
स्यंयत्नाभावः लघुत्वंगुरुत्वाभावः काठिन्यंस्पर्शभेदःस्नेहाभावः एवंरौक्ष्यं
रूक्षपदस्यास्निग्धपर्यायत्वदर्शनात् इतिनाधिक्यं चलनात्मकमिति सं

योगविभागयोरनपेक्षकारणत्वं स्वपृष्ठाद्राविभागासहकारेणस्वजन्यविभागाधी
नसंयोगजनकत्वमितियावत् कर्मत्वजातिमत्त्वंवालक्षणं चलनात्मत्वोक्तिस्तु
तादृशजातेश्चलतीत्यनुगतमतिसिद्धत्वस्फोरणाय ननुकर्मनातिरिक्तंसंयो
गविभागसंतानस्यैवचलतीतिप्रत्ययविषयत्वादितिचेन्न निश्चलेपितला
देःपिपीलिकादिसंयोगविभागादिसंतानसत्त्वाच्चलनप्रत्ययापत्तेः संयोग
विभागादेर्दिग्द्वयतयाप्रतीतेः संयोगादिप्रतीतेःप्रतियोगिसापेक्षत्वाच्च चलत्या
दिप्रत्ययस्यानपेक्षत्वादित्यलं अन्यदिति भ्रमणंरेचनंस्पंदनोर्ध्वज्वलनति
र्यक्पतननमनोन्नमनादिकंगमनमेवेति अनियतदेशसंयोगविभागका॰ ताम॰
रणं नचोत्क्षेपणादिकमपिगमनांतर्गतमेवास्तुऊर्ध्वंगच्छतिअधोगच्छतीत्या ७५

दिव्यवहारादिव्यवहारादितिवाच्यं उत्क्षेपणत्वादीनांजातिभेदात्प्रत्ययभेदइति
भ्रमणत्वादेर्जलादिभ्रमणेस्पंदनत्वादिनासांकर्यान्नजातित्वमिति क
र्मपंचमक्षणोत्पन्नध्वंसप्रतियोगि तथाहि क्रियाततोविभागः ततःपूर्वसं
योगनाशस्ततउत्तरसंयोगस्ततःक्रियानाशइति इदंचप्रायिकं आश्रयनाश
सामग्रीकालोत्पन्नस्यचतृतीयेनाशात्नित्यमेकमिति अनेकानुगतंअ
नेकसमवेतं एतच्चानायैवचैकपदरूपं गोत्वादिसामान्यंचसास्नादिमद्व
क्तिमात्रवृत्ति ननुप्रलयेसर्वपिंडानांउच्छेदेसामान्यमप्युच्छेद्येतेतिचेन्न स्व
रूपसत्तायाःसद्भावात् नचतस्यैकत्वेनित्यत्वेसमवायस्यापितत्वादस्याव
पिसमवायसत्त्वाकृत्वाधारत्वापत्तिरितिवाच्यं यतःकिंचिदधिकरणंरूप

समवायिकारणं किंचिन्नेत्यत्राधिकरणस्वभाव एवोत्तरं तथाच वायोरूपसम
वायिकारणत्वाभावान्नस्वरूपाधिकारणत्वाभावान्नस्वरूपाधिकरणेतिवत्
अधिकरणस्वाभावाद्यादेवनतत्रगोत्वाधिकरणतासंबंधमात्रस्यसंबं
ध्याधारताप्रयोजकत्वाभावात्संयोगतोप्येवदस्यापिकुंडाधारताप्रसंगात्
द्रव्यगुणकर्मवृत्तिपरंसत्तेति नचात्रमानाभावः भावीनतोवर्त्तमानश्च
सर्वएवघटःसन्नतुसदन्यइत्यनुगतमितिनि अत्रत्रुटिः मैवहृत्तिनिया
मकेत्यादिनान्योन्याभावव्युदासः स्वतादात्म्यावच्छिन्नप्रतियोगिताकत्व रम॰
स्यस्वयंवक्ष्यमाणत्वेनयथाश्रुतेनतद्वारवारणात् अन्योन्याभावंलक्ष ७५
यति तादात्म्यसंबंधेति इदंतुस्वरूपकथनंनतुलक्षणं संयोगादेरपिसं

योगितादात्म्यारूपत्वेनात्यंताभावसाधारण्यात् लक्षणंतुनित्यत्वेसति
अत्यंताभावभिन्नाभावत्वं अनयोरेवचसामान्यधर्मावच्छिन्नप्रतियोगि
ताकत्वंननुध्वंसप्रागभावयोः सामान्यधर्मस्यघटपटोभयत्वादिरूपे-
ण्यवृत्तिः घटत्वादिरव्यासज्यवृत्तिः इदंनास्तीत्यादौइदंत्वेनैवाशिष्यादिश्चया-
द्यः आत्मज्ञानस्यैवमुक्तिप्रयोजनकत्वेनमुख्यत्वात्प्रथमंद्रव्यनिरूपणं
सामान्यरूपेणतस्यबोधेविशेषजिज्ञासायांकर्त्तव्यादिनातन्निरूपतद
नंतरंगुणानांसंयोगविभागयोरनपेक्षकारणत्वेनकर्मनिरूपणस्यगुप
णनिरूपणाधीनत्वात् अनंतरंकर्मणः परमपरंचेत्यादिनासामान्यनि
रूपणस्ययावदाश्रयनिरूपणसापेक्षतयायावदाश्रयनिरूपणोत्तरंसामा

न्यस्य सामान्यभिन्नत्वादिना विशेषनिरूपणस्य सामान्यनिरूपणाधीनतया
तदनंतरं विशेषस्य नित्यसंबंधत्वेन समवायनिरूपणस्य विशेषनिरूपणा
धीनतयाऽनंतरं समवायस्य अभावस्य प्रतियोगिनिरूपणाधीननिरूप
णकतया सर्वांतेऽभावस्य निरूपणं ननु शक्तिसादृश्यादीनामतिरिक्त
त्वात्कथं सप्तपदार्था इति। अत आह। सर्वेषामिति। शक्तिसादृश्यादीनां प्रमा
णप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णय। वादजल्पवितंडा
हेत्वाभासछलजातिनिग्रहस्थानानां षोडशपदार्थानां चेत्यर्थः यथायथा
मुक्तेष्वेवेति। सप्तपदार्थेष्वेवेत्यर्थः उत्तेजकाभावविशिष्टमण्यभावस्य दाहं राम॰ ७६
प्रतिहेतुत्वकल्पनयैवोपपत्तेर्न दाहानुकूलशक्तिः कल्प्यते ततभेदसामा

नाधिकरण्यतत्तदसाधारणधर्मरूपस्य सादृश्यस्यापि तत्तदसाधारणधर्मरूपे
त्वेनानतिरिक्तत्वात् प्रत्यक्षप्रमाणस्य इंद्रिये इतरेषां प्रमाणानां गुणे प्रमेयाणा
मात्मशरीरेंद्रियमनसां द्रव्ये गंधरूपरसस्पर्शशब्दबुद्धिप्रवृत्तिरागद्वेषमोहा
नां गुणे प्रेत्यभावो मृत्वाजननं। तदीयमरणं च तदीयजीवनादृष्टनाशः तदी
यचरमप्राणसंयोगध्वंसस्तदीयः प्राणध्वंसो वा तदीयजीवनं तु तदीयविजाती
यशरीरप्राणसंयोगः तथा चेदृशसंयोगात्मकप्रेत्यभावस्य गुणे सुख
दुःखोपभोगरूपफलस्य दुःखयोस्तत्रैव अपवर्गस्य दुःखध्वंसरूपस्याभावे संश
यस्य गुणे प्रवृत्त्युद्देश्यरूपप्रयोजनस्य वादिप्रतिवादिनोः साध्यसाधनोभ
यवत्त्वप्रकारतदभाववत्त्वप्रकारकान्यतरवत्त्वनिश्चयविषयरूपस्य दृष्टां

तस्यदृष्टांतस्यचउक्तेष्वेव प्रामाणिकत्वेनार्थनिश्चयरूपसिद्धांत पूर्वोक्तशास्त्रविशेष
रूपावयवतर्कनिर्णयानांगणेनानाप्रवक्तृकस्योभयपक्षस्थापनावतो निर्णयो
द्देश्यप्रवृत्यवचनसंदर्भरूपस्यवादस्यउभयपक्षस्थापनात् पुरुषशक्त्यपेक्षा
क्षिप्यापनप्रवृत्तवचनसंदर्भरूपजल्पस्यजल्पान्यविजिगीषुकथारूपायाःवि
तंडायाश्चगुणे हेत्वाभासानांचतत्त्वहेत्वादिरूपाणामुक्तेष्वेव वक्तृतात्पर्यविष
येशाब्दतात्पर्यकल्पनायादोषवचनरूपस्यत्रिविधस्यापिछलस्यस्वसाधकता
प्रयोजनरूपेणपरसाधनवचनरूपायाश्च तुर्विंशतिभेदायाश्चपिजातेः अ
खंडिताहंकारेणपराखंडनेनिग्रहः सएववमतीतिनिग्रहस्थानानिग्रहहेत्वना रामु० ७७
यकानीतिफलितार्थः तेषांप्रतिज्ञाहानिप्रतिज्ञान्तरप्रतिज्ञाविरोधप्रतिज्ञा

संन्यासहेत्वंतरार्थांतरनिरर्थका विज्ञाताप्राप्तकालन्यूनाधिकपुनरुक्ता ननुभा
षणाज्ञानविशेषरूपत्वाद्गुणे उत्तराप्रतिपत्त्यभावरूपाप्रतिभाख्यनिग्रहस्थान
स्यत्वभावेखसूचनकेशाममार्जन श्लोकपाठराजवार्त्तादिरूपोत्तराप्रतिपत्त्य
नुकूलव्यापाररूपत्वेपियथायथंउक्तेष्वेव कथायांकार्यांतरोद्भावनादिरूपविक्षे
पाख्यनिग्रहस्थानस्यापिउक्तेष्वेवास्वपक्षेदोषमनुद्धृत्यपरपक्षेदोषाभिधानरू
पमतानुज्ञानरूपस्यतस्यशाब्दरूपत्वाद्गुणे अवसरेनिग्रहस्थानोद्भावनाभाव
रूपपर्यनुयोज्योपेक्षणरूपस्यतस्याभावे अनुयोगानर्हानुयोगात्मकनिरनु
योज्यानुयोगरूपस्यतस्यशाब्दादिरूपत्वाद्गुणदोषे परिगृहीतसिद्धांतविरुद्ध
कथाप्रसंगरूपस्यतस्यतुशाब्देनवादितिसमासः अधिकमन्यत्रानुसंधेयं

नन्विदं न्यायशास्त्रमुत वैशेषिकनयः नाद्यः न्यायनये षोडशपदार्थांगीकारात्
नांत्यः वैशेषिकमते प्रमाणचतुष्टयानंगीकारात् इति चेन्न एतस्य न्यायनया
नुसारित्वात् नैय्यायिकैरपि सप्तपदार्थांगीकारात् तदुक्तं न्यायकुसुमांजलौ
आचार्यैरतो नावेन सह सप्तैव पदार्था इति नियम इति व्याख्यातं चोपाध्यायैः।
भावरूपपदार्थैः षट्कं अभावस्यापि मानसिद्धतया पदार्थत्वोपगमादिति भा
वइति अत एव मणिकृतः सादृश्यस्य सप्तपदार्थातिरिक्तशंका संगच्छते उक्तं
च न्यायनाप्यकृतापि अस्त्यन्यदपि द्रव्यगुणकर्मसामान्यविशेषसमवायाः प्रमे रामं०
यं तन्त्रभेदेन चापरिसंख्येयं अस्य तु तत्त्वाज्ञानादपवर्गो मिथ्याज्ञानात् संसार ७९
इत्येतदुपदिष्टं विशेषणेनास्य वैषां प्रमेयान्तर्गतेनोवेपि प्रमाणादीनां विशेषरू

पेणाभिधानं विचारेऽन्यर्हितत्वादिति स्पष्टमाकरे इति श्रीमद्गाडगिलो
पाख्यमुकुंदभट्टसूरिविरचिता तर्कसंग्रहचंद्रिका समाप्तिमगमत्

श्रीरस्तु श्रीमन्मनोहरोपाख्यावीश्वरगुरोः परम् चरणौ स्मरणी
कृत्य चंद्रिकेयं समापिता १ विबुधानमुधावमाननीया मननीयाकृतिरस्तु
मेध - सु हृदयेषु गुणाक्षरापि वाणी ज्वलिता किं न विराजते कवीनाम्

राम०
७५